अथ Muktavali vyakhya Dinkari

112
5 (A-B)

॥ मुक्तावलीव्याख्या दिनकरी ॥ (A)

(न्यायशास्त्रम्)

147

॥ विषयतावादार्थः ॥ (B)

अथ "विषयतावादार्थः"

112 / 5(A)

श्रीगणेशाय नमः ॥ विषयता च स्वरूपसंबंधविशेषो ज्ञानादीनां विषयेण न त्वतिरिक्ता मानाभावादिति प्राञ्चः ॥ तदसत् ॥ त
था हि ॥ विषयतायाः ज्ञानादिस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या
तादृशज्ञानानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रत्ययवत् भूतलप्रकारकज्ञानवानहमित्यादिप्रत्ययप्रसंगः ॥ घ
टनिष्ठप्रकारताख्यतज्ज्ञानरूपविषयताया भूतलादिवृत्तित्वात् ॥ एवं घटपटाविति समूहालंबनधियो भ्रमत्वाप
त्तिश्च ॥ पटनिष्ठज्ञानरूपविशेष्यतायाः घटनिष्ठघटत्वप्रकारतानिरूपिततज्ज्ञानरूपविशेष्यताभिन्नतया ताद
शज्ञानस्य घटत्वप्रकारतानिरूपितपटनिष्ठविशेष्यताशालित्वात् ॥ विषयस्वरूपत्वे च घटभूतलसंयोगइत्याद्या
कारकसमूहालंबनीयघटादिनिष्ठतत्स्वरूपविषयताभ्यां घटवद्भूतलमित्यादिविशिष्टज्ञाननिरूपितघटादिनिष्ठवि
षयतानां तत्स्वरूपत्वेन अविलक्षणतया समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिः ॥ न च विशिष्टज्ञाने संबंध
ग संबंधाद्यधिकाभासते न तु समूहालंबने इत्येव तयोर्वैलक्षण्यमुपपद्यत इति वाच्यं ॥ संबंधसंबंधमादायापि स
मूहालंबनसंभवात् ॥ घटभूतलसंयोगप्रतियोगितानुयोगित्वादिनेत्यादि ॥ तस्मात्तज्ज्ञानविषयाभ्यां विषय
त्वमतिरिक्तमेवेत्यनन्यगत्या स्वीकरणीयं ॥ न चाश्रयतया विषये ज्ञाने च निरूपकत्वसंबंधेन वर्त्तत इति ॥ एतेन वि

नचविषयताप्रतियोगित्वमेवविषयित्वमस्तु किंतस्या अतिरिक्तत्वस्वीकारेणेतिवाच्यं ।। विषयित्वप्रतियोगित्वमेवविषयित्वमि
त्यपिवक्तुंशक्यत्वात् ।। तस्माद्विनिगमनाविरहेणउभयमेवातिरिक्तं ।। विषयत्वादिकं तु विषयभेदेनभिद्यते ।। अन्यथाघटवद्भूत
१ लमित्यादिज्ञानीयविषयतानांचाभेदप्रसंगेनपूर्वोक्तानुपपत्तिदोषतादवस्थ्यात् ।। नतुज्ञानव्यक्तिभेदेनापिभिद्यते ।। मानाभावा
त् ।। तच्चद्विविधं ।। किंचिद्विषयत्वानिरूपितं किंचिन्निरूपितंच ।। निर्विकल्पकीयविषयता विषयत्वानिरूपिता ।। निर्विकल्प
कीयघटादिविषयतायाः घटत्वादिविषयतानिरूपत्वमानाभावात् ।। विशिष्टबुद्धिविषयताश्च विषयतांतरनिरूपिताः ।। प्रकारताविशे
ना ष्यतासंसर्गरूपाणांतासांपरस्परंनिरूप्यनिरूपकभावसत्वात् ।। अन्यथाघटवद्भूतलमित्याकारकज्ञानविषयतायाः अवैलक्षण्यप्रसंगा
त् ।। मन्मतेप्रथमेघटप्रकारत्वभूतलविशेष्यत्वयोर्वह्निप्रकारत्वपर्वतविशेष्यत्वयोः परस्परंनिरूप्यनिरूपकभावः ।। द्वितीयेतुवह्निप्र
कारत्वभूतलविशेष्यत्वयोर्घटप्रकारत्वपर्वतविशेष्यत्वयोरितिवैलक्षण्यापपत्तेः ।। एवंघटवद्भूतलंघटवान्पर्वतइत्याकार
कसमूहालंबनेभूतलाद्येकैकविशेष्यनिष्ठविशेष्यतायाः अपिघटपटादिप्रकारभेदेनभेदोबोध्यः ।। उभयनिरूपितैक विशेष्यता
प्रकारतायाः उभयप्रकारतानिरूपितैकविशेष्यतायास्वीकारेतादृशसमूहालंबनादावतिरिक्तविषयताकल्पनप्र
संगात् ।। मन्मतेघटवद्भूतलमित्याकारकप्रत्येकज्ञाननिरूपितप्रकारताभ्यांप्रत्येकविशेष्यतानिरूपितप्रकारताभ्यां कृष्ण
प्रकारतानिरूपितविशेष्यताभ्यामेवचउपपत्तेः ।। समूहालंबनप्रकारताभेदेनविशेष्यताभेदेघटवद्भूतलंपटवच्चेति १
समूहालंबनज्ञानात् एकत्रद्वयमितिरीत्यानानाधर्मवैशिष्ट्यावगाहिघटवद्भूतलंपटवदित्यादिज्ञानस्यावैलक्षण्यप्रसंगः

ममतुसमूहालंबनेप्रकारभेदेनविशेष्यताभेदेनतेकत्रद्वयमितिरीत्यातादृशबोधइतिसमूहालंबनतस्तस्यवैलक्षण्या
पपत्तिः ।। विशेष्यत्वंप्रकारत्वंच द्विविधं ।। किंचिद्धर्मानवच्छिन्नं निरवच्छिन्नंच ।। तत्र किंचिद्धर्मावच्छिन्नविशेष्यताभूत
धर्मे लत्वाद्येकविशेषणविशिष्टघटादिरूपापरंवैशिष्ट्यावगाहिज्ञाने ।। तत्रघटादिप्रकारतानिरूपितविशेष्यतायाःभू
तलत्वाद्यवच्छिन्नत्वात् ।। अन्यथाकेवलमेकत्रद्वयमितिरीत्योभयवैशिष्ट्यावगाहिनोभूतलंघटवदितिज्ञानाद्वि
शिष्टवैशिष्ट्यबोधस्यवैलक्षण्यानुपपत्तेः ।। किंचिद्धर्मावच्छिन्नप्रकारताचविशिष्टनिरूपितवैशिष्ट्यावगाहिघटवदि
त्याकारकज्ञाने ।। तत्रघटादिप्रकारतायाघटत्वाद्यवच्छिन्नत्वात् ।। अन्यथाकेवलविशेष्यविशेषणतत्रचविशे
षणांतरमितिरीत्याघटघटत्वाद्यवगाहिनस्तथाविधज्ञानाद्विशिष्टवैशिष्ट्यबोधस्यवैलक्षण्यानुपपत्तिः ।। अप्रपंचितंचेदमन्य
त्राधिकं ।। तदेवविशेषणतापन्नस्यैवतन्निष्ठविषयतावच्छेदकमितितुबोध्यं ।। तद्धर्मावच्छिन्नविषयताकत्वंतद्धर्मप्रका
रतानिरूपिता ।। तस्यास्तथात्वेमानाभावात् ।। नचैवंभूतलंघटवदित्यादिज्ञानानांभूतलत्वादिप्रकारतानिरूपितविशेष्य
ताशालित्वानुपपत्तिरितिवाच्यं ।। केवलमेकत्रद्वयमितिरीत्याभूतलत्वघटवैशिष्ट्यावगाहिज्ञानीयभूतलत्वा
नवच्छिन्नभूतलत्वादिप्रकारतानिरूपितविशेष्यतानियामकसामग्र्या अपितादृशविशिष्टवैशिष्ट्यबोधकाले
सत्वाचस्यतादृशविषयताशालित्वस्यावश्यकत्वाचनचैवंतथात्वोपपत्तेः ।। वस्तुतस्तु ।। विशिष्टवैशिष्ट्यबोधांक्वा

ऽनिरवच्छिन्नविषयतानां निखिलविशिष्टबोधसाधारणस्यखंडितत्वात् तथाविधविशेष्यताशून्यबोधस्य भूतलत्वा
दिप्रकारतानिरूपितविशेष्यताशालित्वोपपत्तये भूतलत्वावच्छिन्नविशेष्यतायाएव तत्प्रकारतानिरूपितत्वंस्वी
२ करणीयं ॥ अथैवं तादृशज्ञानस्य भूतलत्वप्रकारतानिरूपितभूतलत्वाद्यवच्छिन्नविशेष्यताशालित्वाद्भूतल
त्वविशिष्टभूतलवैशिष्ट्यावगाहिना भूतलं भूतलमित्याकारकज्ञानस्य वैलक्षण्यानुपपत्त्या तादृशज्ञानानंतरं भूतलत्वविशि
ष्टभूतलवैशिष्ट्यावगाहिस्मरणापत्तिरितिचेन्न ॥ घटवद्भूतलमित्याकारकज्ञानीयभूतलविशेष्यतायाः भूतलत्वप्रकार
तानिरूप्यत्वेपितस्याः भूतलत्वाद्यवच्छिन्न विशेष्यत्वेन न तन्निरूप्यत्वं ॥ किंतु भूतलत्वविशेष्यतात्वेन भूतलं भूतलमि
त्यादौ च भूतलत्वाद्यवच्छिन्नविशेष्यताया भूतलत्वावच्छिन्नविशिष्ट विशेष्यतात्वेनैव भूतलत्वप्रकारतानिरूपि
तत्वमित्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः ॥ अवच्छेदकत्वमपि द्विविधं ॥ सावच्छिन्नं निरवच्छिन्नंच ॥ तत्राव
च्छिन्नावच्छेदकत्वं ॥ ज्ञानमहत्त्वदित्यादौ तत्र भूतलनिष्ठविशेष्यतावच्छेदकतायाः ज्ञानत्वाद्यवच्छिन्नत्वात् ॥ भूतलंघ
टवदित्यादौ च भूतलत्वनिष्ठविशेष्यतावच्छेदकत्वादिकं निरवच्छिन्नमिति ॥ एवमवच्छेदकतानिरूपितावच्छेदकत्वा २
दिकमपि व्याख्यातं ॥ अवच्छेदकतावच्छेदकत्वमवच्छेदकत्वांशे विशेषणतापन्नस्येति तु बोध्यं ॥ विषयतावद्विषयतापि भे
देनाननुगतानां अनुगमकं विषयतात्वमप्यतिरिक्तमास्थेयं ॥ अन्यथा घटो ज्ञानविषयः पटो ज्ञानविषय इत्याका
वह्निमदन्यं ॥ वह्नित्ववद्वान्न इत्यादौ ॥ आद्या निरवच्छिन्ना ॥ द्वितीया च सावच्छिन्ना ॥

अथ "विषयतावादार्थः"

112 / 5(A)

श्रीगणेशायनमः ॥ विषयता च स्वरूपसंबंधविशेषो ज्ञानादीनां विषयेन तत्त्वनिरिक्ता मानाभावादिति प्राञ्चः ॥ तदसत् ॥ त
था हि ॥ विषयतायाः ज्ञानादिस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या
तादृशज्ञानानंतरं घटप्रकारकज्ञानवानहमित्यादिप्रत्ययवत् भूतलप्रकारकज्ञानवानहमित्यादिप्रत्ययप्रसंगः ॥ घ
टनिष्ठप्रकारताख्यतज्ज्ञानरूपविषयताया भूतलादिवृत्तित्वात् ॥ एवं घटपटादिसमूहालंबनधियो भ्रमत्वाप
त्तिश्च ॥ पटनिष्ठज्ञानरूपविशेष्यतायाः घटनिष्ठघटत्वप्रकारतानिरूपिततज्ज्ञानरूपविशेष्यताभिन्नतया तादृ
शज्ञानस्य घटत्वप्रकारतानिरूपितपटनिष्ठविशेष्यताशालित्वात् ॥ विषयस्वरूपत्वेपि घटभूतलसंयोगइत्याद्या
कारकसमूहालंबनीयघटादिनिष्ठतत्स्वरूपविषयताभ्यां घटवद्भूतलमित्यादिविशिष्टज्ञाननिरूपितघटादिनिष्ठवि
षयतानां तत्स्वरूपत्वेनाविलक्षणतया समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिः ॥ नचविशिष्टज्ञाने संबंध
न संबंधोप्यधिकोभासते नतु समूहालंबनइत्येव तयोर्वैलक्षण्यमुपपादनीयमिति वाच्यं ॥ संबंधसंबंधमादायापि स
मूहालंबनसंभवात् ॥ घटभूतलसंयोगप्रतियोगित्वानुयोगित्वादीनीत्यादि ॥ तस्मात्तज्ज्ञानविषयाभ्यां विषय
त्वमतिरिक्तमेव सन्नन्यगत्या स्वीकरणीयं ॥ नच आश्रयतया विषयज्ञानं च निरूपकत्वसंबंधेन वर्तत इति ॥ एतेनवि

विषयतावाद। विशेष्यतात्वात द्भिन्नेति ॥ द्वितीयं च द्रव्यत्वप्रकारतानिरूपितघटत्वविशेष्यताभूतलनिष्ठविशेष्यतानिरूपितप्रकारता थ.राम
भिन्ना घटत्वप्रकारतानिरूपितविशेष्यतात्वात् द्भिन्नेति वैलक्षण्योपपत्तिः ॥ एवं रक्तदंडवान्पुरुष इत्यादिज्ञाने रक्त
त्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यतेव पुरुषविशेष्यतानिरूपितप्रकारतारूपा ॥ तद्भिन्ने रक्तो दंडः दंडवा
न्पुरुषः इत्यादिसमूहालंबनात्तादृशविशिष्टबुद्धेर्वैलक्षण्यानुपपत्तेश्च ॥ उभयत्रैव रक्तत्वप्रकारतानिरूपित
दंडविशेष्यतायाः दंडप्रकारतानिरूपितपुरुषविशेष्यतायाश्च सत्वात् ॥ केचित्तु ॥ प्रकारतावदुद्देश्यत्वविधेयत्ववि
षयताविशेषौ ॥ न च किंचिद्धर्मावच्छिन्नविशेष्यत्वमेवोद्देश्यत्वं ॥ तादृशविशेष्यतानिरूपितप्रकारकत्वमेव विधे
यत्वमस्तु ॥ किं तयोरतिरिक्तत्वस्वीकारेणेति वाच्यं ॥ तथा सति वह्निमान्पर्वतो घटवानित्यादिबोधस्यापि पर्व
तत्वावच्छिन्नोद्देश्यतानिरूपितवन्ह्यादिविधेयताशालित्वात् पर्वतो वह्निमानित्याकारकानुमित्यनंतरं मि
वत्वात्तादृशानुमित्यनंतरमपि पर्वतो वह्निमनुमिनोमीत्याकारकानुव्यवसायापत्तेः ॥ मन्मते तादृशज्ञानव्यावृत्ता
८ याः पर्वतविशेष्यतानिरूपितप्रकारताविलक्षणायाः पर्वतोद्देश्यतानिरूपितवन्ह्यादिनिष्ठविधेयतायाएव ता ८

दिष्ठा
नि

दृशानुव्यवसायाभ्युपगमात् ॥ तत्र तदभावादेव तादृशानुव्यवसायापत्त्यसंभवात् ॥ अथ पर्वतविशेष्यकवन्हिप्रकारकानुमि
तित्वमेव तादृशानुव्यवसायविषयः ॥ विषयतासंबंधेन तादृशानुव्यवसायं प्रति पर्वतविशेष्यकवन्हिव्याप्यवत्ताज्ञान
जन्यानुमितित्वेन तादात्म्यप्रत्यासत्त्या हेतुत्वोपगमात् ॥ न वन्हिमान्पर्वतो घटवानित्याकारकानुमित्यनंतरं तथाविधानुव्य
वसायापत्तिरिति किमतिरिक्तविधेयतया ॥ न च तादृशागुरुधर्मावच्छिन्नस्य तथाविधानुव्यवसायहेतुत्वकल्पने पक्षया
पर्वतोद्देश्यतानिरूपितवन्हिविधेयकानुमितित्वेन हेतुत्वकल्पनेन लाघवादतिरिक्तविधेयतासिद्धिरिति चेन्न ॥ लाघ
वमात्रेणातिरिक्तविषयतासिद्धौ धूमपरामर्शजन्यतावच्छेदकतयापि विलक्षणविषयतासिद्धिप्रसंगात् ॥ कृप्तविषय
तायास्तज्जन्यतावच्छेदकत्वे आलोकादिलिंगकानुमितिसाधारणतया व्यभिचारवारणाय स्वाव्यवहितो ॥ त्तरत्वस्य
कार्यतावच्छेदककोटिप्रविष्टत्वे चातिगौरवात् ॥ अथातिरिक्तविधेयतानभ्युपगमेपि सिध्यभावजन्यतावच्छेदकमनु
पपन्नं ॥ तथाहि ॥ पर्वतो वन्हिमानित्यादिसिध्यभावजन्यतावच्छेदकं न तावत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितव
न्हिप्रकारकानुमितित्वं वन्हिमान्पर्वतो घटवानित्यादृशानुमितेर्व्यभिचारात् ॥ नापि पर्वतत्वावच्छिन्नविशेष्यता
कवन्हिव्याप्यज्ञानजन्यानुमितित्वं वन्हिव्याप्यधूमवान्पर्वतो घटवांश्चेत्याकारकसमूहालंबनजन्यायां तथाविधा

विषयतावादा नुमितौ व्यभिचारादिति चेन्न ॥ वन्हित्वान्यधर्मावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नपर्वतत्वावच्छिन्नविशे र्थ॰ राम
ष्यताकानुमितित्वस्यैव पर्वतो वन्हिमानित्यतादृशसिध्यभावजन्यतावच्छेदकत्वसंभवात् ॥ वन्हिमान्पर्वतो घट
४ वानित्याकारकानुमितिविशेष्यतायाः वन्हित्वान्यघटत्वावच्छिन्नप्रकारतानिरूपितत्वेन व्यभिचारानवकाशात्
व नचैवं वन्हिमत्पर्वतवानयं देश इत्याकारकानुमितौ व्यभिचारो दुर्वारः ॥ तादृशानुमितिनिरूपितमुख्यविशेष्यता
या एव निवेशनीयत्वात् ॥ नच एतद्देशस्य पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवन्हित्वावच्छिन्नविधेयतायोस्तादृशसिध्यभावज
न्यतावच्छेदकत्वे लाघवात् सिद्धिरिति वाच्यं ॥ लाघवेनातिरिक्तविषयतासिद्धेः प्रागेव निरस्तत्वादिति चेन्मैवं ॥ अति
रिक्तविधेयतानभ्युपगमे वन्हिं नानुमिनोमि नोमीति प्रतीतेरनुमितिनिष्ठावन्हिप्रकारकत्वाभाव आत्मनिष्ठावन्हि ४
प्रकारकानुमितित्वावच्छिन्नाभावो वा विषयो वाच्यः ॥ तथाच वन्हिमान्पर्वतो घटवान्वा वन्हिमत्पर्वतवानयं देश इत्याद्यनु
मितिकाले तथाप्रतीत्यनुदयप्रसंगः ॥ तादृशानुमितौ वन्हिप्रकारकत्वाभावस्यात्मनि तथाविधानुमितित्वावच्छिन्ना
भावस्य सत्वात् ॥ मम तु वन्हिविधेयकत्वाभावस्यानुमितौ तादृशानुमितित्वावच्छिन्नाभावस्यात्मनि तादृशप्रतीति

। अनुगतप्रतीतिरनुगतधर्मं विना न संभवतीति ॥

रिकाया अनुगतप्रतीतेरनुपपत्तेः ॥ घटत्वादिविशिष्टबुद्धित्वावच्छिन्नं प्रति घटत्वादिविषयकज्ञानत्वादिना हेतुत्वानुपपत्तिश्च ॥
घटत्वाद्येकैकविषयवृत्तिविषयतानां प्रकारता विशेष्यतादिभेदेन नानाविधतया कारणतावच्छेदकाननुगमेन व्य
न भिचारप्रसंगात् ॥ एवं विषयतो विदवांतरावच्छेदकता च प्रकारतात्व विशेष्यतात्वादिकमपि अनुगतप्रतीतिब
लादतिरिक्तमभ्युपगन्तव्यं ॥ अत एव पर्वतीयत्वावच्छिन्नविशेष्यकवन्ह्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशे ५
ष्यतानिरूपितवन्हिव्याप्यधूमादिप्रकारतानां लिङ्गज्ञानत्वादिनानुगतहेतुत्वकल्पनमुपपद्यते ॥ अन्यथा तत्तद्व्यक्तित्वादिभे
देन भिन्नानां [redacted] प्रकारत्वादीनामननुगमेन तदनुपपत्तेः ॥ प्रकारतात्वविशेष्यतात्वादिकं न मिथो
भिसा विरुद्धं ॥ घटवद्भूतलमित्यादिज्ञाननिष्ठघटत्वादिप्रकारतानिरूपितघटनिष्ठविशेष्यताया एव भूतलत्वनिष्ठविशेष्यतानि रो
रूपितप्रकारतात्वरूपतया तत्र विशेष्यतात्वप्रकारतात्वयोः समावेशात् ॥ अत्र तादृशप्रकारताविशेष्यतयोर्भेदे घ
घटस्य द्रव्यत्वेन भान टवद्भूतलं द्रव्यं च द्रव्यवद्भूतलं घटव[illegible]इति ज्ञानयोर्वैलक्षण्यस्याप्यनुपपत्तेः ॥ उभयत्रैव घटत्वप्रकारतानिरूपिताया द्र
व्यत्वप्रकारतानिरूपितायाश्च घटविशेष्यतायाश्च घटप्रकारतानिरूपितभूतलविशेष्यतायाश्च सत्वात् ॥ मन्मते
घटत्वप्रकारतानिरूपितघटविशेष्यता भूतलनिष्ठविशेष्यतानिरूपितप्रकारत्वाभिन्ना द्रव्यत्वादिप्रकारतानिरूपित

सादिसाधारणवन्ह्यादिप्रकारतातोवन्हिमान्पर्वतोघटवानित्यादिज्ञानीयप्रकारताभेदेमानाभावात् ॥ विधेयतास्वीकारेपितथा
विधानुमितिदशायांनानुमिनोमीत्यनुव्यवसायोपपत्तितादवस्थ्यमितिवाच्यं ॥ वन्हिमान्पर्वतोघटवानित्यादिज्ञानीयवन्हि
प्रकारतायाघटादिप्रकारतानिरूपितत्वयापर्वतोवन्हिमानित्यादिज्ञानीयवन्ह्यादिप्रकारतायाश्चतथात्वेनतयोर्भेदस्या
वश्यकत्वादितिचेन्नैवं ॥ प्रकारताघटितातिरिक्तविधेयतानभ्युपगमेपर्वतेवन्हिरित्यादिशाब्दबोधस्यवन्ह्यादिविधेयकपर्वतो
द्देश्यकत्वानुपपत्तेरतिरिक्तविधेयत्वकल्पनमावश्यकमेव ॥ नचतत्रनास्त्येववन्हिपर्वतोद्देश्यविधेयभावः ॥ किंतुविशेष्यविशे
षणभावएवतयोर्वन्हिपर्वतवृत्तित्वयोरितिवाच्यं ॥ शाब्दबोधस्थलेप्राङ्निर्दिष्टस्योद्देश्यतयाचरमनिर्दिष्टपदार्थस्यचविधे
यतयाताद्दशवाक्यजन्यशाब्दबोधेवन्हिपर्वतयोरुद्देश्यविधेयभावसत्वात् ॥ अन्यथावन्हिःपर्वतेपर्वतेवन्हिरित्यादि
वाक्यजन्यशाब्दबोधयोर्विशेषणपरावविशेष्यभाववैलक्षण्येनवैलक्षण्यानुपपत्तेः ॥ अतएवगुणानांगुणत्वस्योद्देश्यत्वाव
च्छेदकत्वंतस्यैवविधेयत्वमितिअभिप्रायेणोपाध्यायकृतोउद्देश्यतावच्छेदकविधेययोरैक्येशाब्दबोधानुपपत्तिराशंकिता।
यदिविशेष्यविशेषणभावापन्नयोरेवोद्देश्यविधेयभावः ॥ तदात्रगुणत्वस्यविशेष्यतयागुणवृत्तित्वस्यचविशेषणतया
गुणत्वस्यतथात्वेनतद्ग्रंथेतमसंगतमेवस्यादिति ॥ एवंविधेयत्वादीनांप्रकारताविशेषतादिरूपत्वेतरध्यायकोभूता
भावप्रतियोगिमतीपृथिवीत्यादिपरामर्शजन्यतायाः पृथिव्यामितरभेदइत्याकारकसाध्यविशेष्यकानुमितेः
सद्विधेयकत्वानुपपत्त्यातदुत्तरमितरभेदेनानुमिनोमीत्यनुव्यवसायापत्तेः ॥ नचताद्दशज्ञानीयेतरभेदविशे

ष्यकानुमितेःतद्विधेयकानुमितेःतद्विधेयकत्वानुपपत्त्यातदुत्तरमितरभेदेनानुमिनोमीनोमीत्यनुव्यवसायापत्तिः ॥ नचताद्दशज्ञानीयइ
तरभेदविशेष्यतायामेवविधेयतात्वोपगमान्नताद्दशानुमितेरितरभेदादिविधेयकत्वानुपपत्तिरितिवाच्यं ॥ तथासतिपृथिवीव्याप्य
वानितरभेदइत्याकारकपरामर्शजन्यायाः आधेयतासंबंधेनपृथिव्यादिसाध्यकतथाविधानुमितेरपीतरभेदादिविधेयत्वापत्तेः
तथाविधानुमित्योर्विशेष्यतावैलक्षण्याभावादिति ॥ अथपर्वतेवन्हिरित्यादिशाब्दबोधपृथिव्यामितरभेदइत्याद्यनुमितौ अतिरिक्तविधे
यतादिसिद्धावपिपर्वतोवन्हिमान्पृथिवीतरभेदवतीत्याद्याकारकानुमित्यादौप्रकारताघटितातिरिक्तविधेयत्वादौमानाभावः ॥
वन्ह्यादिरूपैकैकप्रकारतादिनिरूपकानंतानुमित्यादिव्यक्तिष्वतिरिक्तविधेयत्वकल्पनापेक्षयाताद्दशप्रकारत्वादौ
तादृशविधेयत्वकल्पनो[redacted]याएवोचितत्वादितिचेन्न ॥ प्रत्यक्षादिसाधारणप्रकारतायांविधेयतात्वांगीकारे ॥ अनुमित्यादिस्थलेबाध
बुद्धीनांप्रतिबंधकतयाइच्छाधीनप्रत्यक्षेव्यभिचारवारणायप्रत्यक्षान्यत्वस्यप्रतिबध्यतावच्छेदककोटौनिवेशनीयतयागौ
च वात् ॥ मन्मतेविधेयतायास्ताद्दशप्रतिबध्यतावच्छेदककोटौनिवेशनीयतया[redacted]तस्याश्चप्रत्यक्षसाधारण्यान
भ्युपगमेन आहार्यप्रत्यक्षेव्यभिचारविरहेणप्रत्यक्षान्यत्वस्यानिवेशात् ॥ नचपरोक्षत्वजातेःप्रतिबध्यतावच्छेदकत्वोपगमेनवाहा
र्यप्रत्यक्षेव्यभिचारसंभवेनमयापिप्रत्यक्षान्यत्वेननिवेश्यतइतिवाच्यं ॥ परोक्षत्वजातेरन्यत्रदूषितत्वात् ॥ अथलाघवेनाति
रिक्तविधेयतासिद्धेःप्रागेवनिरस्तत्वात्कथमताद्दशयुक्त्याताद्दशानुमित्यादौवन्हित्वादिविशिष्टविधेयतासेत्स्यतीतिचेन्न ॥ एताद्दशयु

तस्यातादृशविषयत्वंनकल्प्यते ॥ किंतुपर्वतोवह्निः पृथिव्यामितरभेदः इत्याद्याकारकशाब्दानुमित्यादौपूर्वोक्तयुक्त्यासिद्धयपर्वतोव
ह्निमान्पृथिवीतरभेदवतीत्याद्याकारकानुमित्यादावेवतादृशसंबंधेनसंबंधःकल्प्यतेप्रतिनकाप्यनुपपत्तिः ॥ अथपृथिव्यामित
रभेदःपृथिवीतरभेदवतीत्याकारकानुमित्योरेकविधेयताशालिकारसाध्यविशेष्यकानुमितौसाध्यप्रसिद्धेःप्रतिबध्यतावच्छे
दकंदुर्वचं ॥ तथाहि ॥ इतरभेदज्ञानस्यप्रतिबध्यतावच्छेदकंयदिइतरभेदविशेष्यकानुत्वंतदेतरभेदःपृथिवीव्याप्यवानित्या
दिपरामर्शजन्याधेयत्वसंबंधेनपृथिवीविधेयकइतरभेदपक्षकानुमितौव्यभिचारात् ॥ इतरभेदविधेयकत्वस्यतत्रविशेष्यका
नुमितित्वस्यैवप्रतिबध्यतावच्छेदकत्वेपिपृथिवीतरभेदव्याप्यवतीतरभेदःपृथिवीव्याप्यवानित्याकारकसमूहालंबनज्ञानज
न्यायांपृथिवीतरभेदवतीपृथिव्यामितरभेदइत्येतादृशसमूहालंबनानुमितौव्यभिचारः ॥ तादृशानुमितावितरभेदविधेयक
त्वात्तद्विशेष्यकत्वाच्च ॥ मन्मतेप्रकारताभिन्नविधेतरविधेयतैवेतरभेदज्ञानप्रतिबध्यतावच्छेदिकेतिनव्यभिचारः ॥ तादृशा
समूहालंबनानुमितिनिरूपितेतरभेदविधेयतायाःप्रकारतारूपत्वात् ॥ तदन्यत्वाभावादितिवाच्यं ॥ इतरभेदविशेष्यक
परामर्शजन्येतरभेदविशेष्यकानुमितित्वस्यैवमन्मतेइतरभेदज्ञानप्रतिबध्यतावच्छेदकत्वोपगमात् ॥ पृथिवीव्याप्य
वानितरभेदइत्याकारकपरामर्शजन्यानुमितावितरभेदविशेष्यकपरामर्शजन्यत्वेनव्यभिचारानवकाशात् ॥ नचए
तादृशगुरुधर्मस्यसाध्यप्रसिद्धिप्रतिबध्यतावच्छेदकत्वेगौरवात्तदपेक्षयापृथिवीतरभेदवतीत्याकारकानुमितिन

विषयत्वोपगमान्नानुपपत्तिः ॥ नचतदानीं भ्रमात्मिकैवतादृशप्रतीतिरुत्पद्यते तत्रविषयासत्त्वमकिंचित्करमिति
वाच्यं ॥ यथाकथंचिद्भ्रमत्वस्यशक्योपपादनत्वेप्रतीतिप्रमात्वस्यकल्पनायाअन्याय्यत्वात् ॥ नचवह्निव्याप्यवत्ता
ज्ञानजन्यत्वस्यानुमितित्वावच्छिन्नाभावस्यैवतादृशप्रतीतिविषयत्वोपगमात् ॥ तादृशानुमितेश्चातथात्वेनातिरि
क्तविधेयतानभ्युपगमेपिनतथाविधानुपपत्तिरितिवाच्यं ॥ तथासत्यपिपूर्वोक्तसमूहालंबनजन्यतथाविधा
नुमित्यनंतरंतथाविधाप्रतीत्यनुपपत्तितादवस्थ्यात् ॥ अनुमितिपरामर्शयोः कार्यकारणभावग्रहदशायाम
पितादृशसंशयस्यसर्वानुभवसिद्धत्वात् ॥ तादृशाभावस्यतद्विषयत्वासंभवात् ॥ अथैवमतिरिक्तविधेयत्वमा
स्तां ॥ उद्देश्यत्वंविशेष्यत्वमेवास्तु ॥ किंचविधेयतावद्विधेयतात्वमप्यतिरिक्तमेवश्यंवाच्यं ॥ अन्यथातत्तद्वि
धेयादिभेदेनभिन्नतयाननुगमात् ॥ तद्घटितोपदर्शितधर्मावच्छिन्नप्रतियोगिताकाभावस्यासंभवात् ॥ अ
भावकूटस्यचदुर्ज्ञेयत्वेनतादृशप्रतीत्यनुपपत्तितादवस्थ्यात् ॥ नचातिरिक्तविधेयत्वादिकंअनर्थकं ॥ पर्वतो
वह्निमानित्याकारकप्रत्यक्षादिसाधारणवह्न्यादिप्रकारतायांविधेयतात्वस्वीकारेणैवोपपत्तेः ॥ नचतादृशप्रत्य

बंधेनहेतुत्वान्नोपदर्शितसमूहालंबनानंतरंतादृशानुव्यवसायप्रसंगः॥ आपत्तित्वंचमानसत्वव्याप्योजातिविशेषः॥ वन्हिमा
पादयामीत्यनुभवसाक्षिकश्च॥ नचातिरिक्तविषयतानभ्युपगमेवन्ह्यादिनिर्णयजन्यतावच्छेदकंवन्हिप्रकारकापत्तित्व
मेववाच्यं॥ तथाचतादृशसमूहालंबनापत्त्यादौव्यभिचारइतिवाच्यं॥ अनुमितिस्थलीयकार्यकारणभावइवकारणेविशि
ष्टंनिवेश्यैवव्यभिचारस्यवारणीयत्वात्॥ भवन्मतेप्यन्यापादकापत्तौव्यभिचारणायतद्वैशिष्ट्यस्यनिवेशस्यावश्यकत्वात्
॥ एवंचवन्ह्यभावादिनिर्णयजन्यतावच्छेदककोटावपितद्वैशिष्ट्यस्यनिवेशनीयतयानतस्यसमूहालंबनापत्त्यादौव्यभिचारः॥
त्वन्मतेपिवन्हिमद्बुद्ध्यादिनिर्णयजन्यवन्ह्याद्यापत्त्यादौव्यभिचारवारणायतद्वैशिष्ट्यनिवेशस्यावश्यकत्वात्॥ नचपर्वतत्वाव
च्छिन्नविशेष्यकवन्ह्यादिविशिष्टबुद्धौपर्वतत्वावच्छिन्नविशेष्यकवन्ह्यभावादिनिर्णयाभावहेतुतायांपर्वतोवन्हिमान्इत्या
दिसापत्तौव्यभिचारवारणायपर्वतत्वावच्छिन्नविशेष्यकवन्ह्याद्यापादकापत्त्यन्यत्वंजन्यतावच्छेदककोटौनिवेश्यमितिजन्यताव
च्छेदककोटौनिवेशनतयाविषयताविशेषसिद्धिः॥ वन्हिप्रकारकापत्त्यन्यत्वस्यतत्रनिवेशेवन्हिमान्पर्वतोघटवान्इत्यादित्या
दिसमूहालंबनानांबाधदशायामापत्तेरितिवाच्यं॥ जन्यतासंबंधेनवन्ह्यभाववत्तानिर्णयवदन्यत्वस्यैवनिवेशनीयतयाव्य
भिचाराप्रसक्तेर्वारणसंभवात्॥ जन्यत्वस्यनिवेशनोपेक्षयाविषयताविशेषनिवेशात्॥ लाघवात्तत्सिद्धिरितितुनवाच्यं

कार्यतावच्छेदकादिलाघवेनातिरिक्तविषयतासिद्धौतत्तदापादकवत्ताज्ञानजन्यतावच्छेदकतयापिविषयताविशेषसिद्धि
प्रसंगात्॥ वस्तुतस्तु॥ बाधाभावजन्यतावच्छेदककोटौजन्यतासंबंधेनबाधवदन्यत्वस्यनिवेशनमेवोचितं॥ अन्यथाबाध
कालीनेच्छाधीनज्ञानेव्यभिचारवारणायइच्छायाउत्तेजकत्वेगौरवात्॥ मन्मतेआहार्यज्ञानस्यापिबाधजन्यतयातस्यकार्यता
वच्छेदकानाक्रांततयाव्यभिचारासंभवेनइच्छायाउत्तेजकत्वानभ्युपगमात्॥ नचबाधकालीनेच्छाधीनज्ञानेबाधहेतुतायाअ
प्रामाणिकतयाएतदनुरोधेनतत्कल्पनेचमहागौरवात्इच्छायाउत्तेजकत्वमावश्यकमितिवाच्यं॥ आपत्तिस्थलेबाध
बुद्धेर्हेतुतायाआवश्यकत्वात्तत्रापत्तित्वमनिवेश्येच्छाकालीनज्ञानसाधारणतादृशबाधबुद्धौअव्यवहितोत्तरज्ञा
नत्वस्यैवतज्जन्यतावच्छेदकत्वोपगमेनातिरिक्तकारणत्वस्याकल्पनात्॥ नचैवमापत्त्यन्यज्ञानस्यापिबाधकालइ
च्छांविनाआपत्तेरितितत्राधिहेतुतागौरवमितिवाच्यं॥ इच्छायाउत्तेजकत्वेअप्रामाण्यग्रहादिभिःसममिच्छाभाववि
शेषणविशेष्यभावविनिगमनाविरहेणानंत्यादिच्छायाहेतुत्वकल्पनस्यैवोचितत्वादितिचेन्न॥ आपाद्यत्वरूपवि
षयताविशेषानभ्युपगमेज्ञाननिष्ठवन्ह्यादिप्रकारकापत्तित्वाभावआत्मनिष्ठस्तादृशापत्तित्वावच्छिन्नाभावोवन्हिनापादयामी
त्यनुव्यवसायविषयोवाच्यः॥ नतुवन्ह्यादिव्यतिरेकनिर्णयजन्यत्वविशिष्टापत्तित्वाद्यभावः॥ तादृशजन्यत्वानुपस्थिति

112
5(A)

दशायामपितादृशप्रतीतेः सर्वानुभवसिद्धत्वात् ॥ तथाचपूर्वोक्तसमूहालंबनदशायांघटमापादयामिनतुवह्निमित्यनुव्यवसायानु
पपत्तिरितितादृशविषयतास्वीकार आवश्यकः ॥ एवंचतादृशविषयतास्वीनिरूपकत्वमेवापत्तित्वं ननुतादृशजातिविशेषोमा
श्री नाभावात् ॥ आपत्त्यन्यज्ञानतादृशविलक्षणविषयत्वादेरभावादेवनापादयामीत्यनुव्यवसायोपपत्तिरितिध्येयं ॥ अत्रेदमवधेयं ॥ विधेय
त्वमेवापत्तौस्वीक्रियते तथाचापत्तिविधेयत्वमेवापाद्यत्वं ॥ वह्निमान्पर्वतोघटवान्स्यादित्याकारकापत्तौचघटस्यैवविधेयत्वमुपगम्यतेन
तुवह्नेरतस्तादृशापत्त्यनंतरंघटमापादयामिनतुवह्निमित्याकारकानुव्यवसायोपपत्तिः ॥ विधेयताया अनुमित्यादिसाधारण्येपितत्रापत्ति
त्वव्यजातिविशेषाभावात् तदनंतरमापादयामीत्यनुव्यवसायः ॥ आपत्तित्वजातेर्मानाभावइतिनतुवाच्यं ॥ आपादयामीत्यनुव्यवसायस्यै
वमानत्वात् ॥ नचतादृशानुव्यवसायस्यविषयताविशेषविषयकत्वेनाप्युपपत्तेर्जातिविशेषविषयकत्वेविवादइतिवाच्यं ॥ विषयभेदेनानं
तविषयताकल्पनापेक्षयातादृशजातिकल्पनेलाघवस्यैवविवादभंजकत्वादिति ॥ नचभवन्मतेबाधबुद्धिप्रतिबध्यतावच्छेदककोटौतद्विधे
यकविजातीयज्ञानभिन्नत्वमनिवेश्यतद्विधेयकान्यत्वनिवेशेनानुमित्याद्यसंग्रहापत्तिः ॥ ममतुतन्निष्ठविलक्षणविषयताकान्यत्वमे
वनिवेश्यतइतिलाघवमितिवाच्यं ॥ इच्छाधीनज्ञानेव्यभिचारवारणायइच्छायाउत्तेजकत्वकल्पनापेक्षयालाघवेनजन्यतासंबंधेन
बाधवदन्यत्वस्यैवनिवेश्यत्वादिति ॥ तेनैवापत्तावपिव्यभिचारस्यवारणात् ॥ तदन्यत्वस्यैवानिवेशात् ॥ कार्यतावच्छेदकादिलाघवे
नातिरिक्तविषयतासिद्धेः ॥ प्रतिबंधसहस्रकल्पितत्वात् ॥ एतेनानुमित्यादिसाधारणविलक्षणविषयताया आपत्त्यादिसाधारण्ये
सिद्धिस्थलीयप्रतिबंधकतायांप्रतिबध्यतावच्छेदककोटौप्रत्यक्षान्यत्वं आपत्त्यन्यत्वंवानिवेश्यइतिगौरवमित्यपिपरास्तमित्यपिपरास्तमितिदिक् ॥

|| इति विषयतावादार्थः समाप्तः ||

112
5(A)

त्वपिनप्रत्यक्षादिसाधारणभेदप्रकारताधिकविषयताकल्पनमेवोचितमितिवाच्यं ॥ तथासतिधर्मितावच्छेदकभेदेनानंतबाधबु
द्धिप्रतिबंधकतायांप्रतिबध्यतावच्छेदककोटौप्रत्यक्षान्यत्वनिवेशेनगौरवात् ॥ तदपेक्षयाधर्मविशेषामिश्रितसाध्यप्रसि
द्धिप्रतिबंधकत्वेतादृशधर्मस्यप्रतिबध्यतावच्छेदककोटिप्रवेशस्यौचित्यादिति ॥ एवमापत्तिस्थले आपाद्यत्वमपिवि
षयताविशेषः ॥ आपत्तिनिरूपितप्रकारतासामान्यस्यतत्त्ववह्निमान्पर्वतोघटवान्स्यादित्याकारकापत्तौव
पिवह्न्यादेरापाद्यतापत्तिः ॥ पर्वतोवह्निमानित्याकारकवह्न्यानवच्छिन्नविशेष्यताशालिज्ञानीयविलक्षणवह्न्यादिप्रकारता
यास्तत्रोपगमेपिवह्निमान्पर्वतोघटवान्स्यादित्याकारकापत्तौवह्न्यादेस्तथात्वोपपत्तेर्दुर्वारत्वात् ॥ अथस्वव्यतिरेकनिर्णयज
न्यतदापत्तिविषयत्वमेवस्वस्यतदापत्तिनिरूपितमापाद्यत्वमस्तु किमतिरिक्तविषयतास्वीकारेण ॥ उक्तसमूहालंब
नापत्तौघटव्यतिरेकनिर्णयस्यैवहेतुतयावह्न्यादेस्तदापाद्यत्वासंभवादितिचेन्न ॥ तादृशव्यतिरेकनिर्णयजन्य
त्वानुपस्थितावपिवह्न्यादिनिष्ठापाद्यत्वावगाहिनोवह्निमापादयामीत्यनुव्यवसायोदयस्यानुभवसिद्धत्वयापाद्यत्वस्या
पाद्यव्यतिरेकनिर्णयजन्यतदापत्तिविषयत्वरूपत्वासंभवात् ॥ अथवह्न्यादिप्रकारकापत्तित्वमेवतादृशानुव्यवसा
यविषयः ॥ तादृशप्रकारतानिरूपितविषयतासंबंधेनतादृशानुव्यवसायप्रतिबन्धाभावनिर्णयजन्यस्यतादात्म्येन

अथ मुक्तावली-व्याख्या दिनकरी ।

112 / 5B

112
5(B)

112
5(B)

श्रीगणेशाय नमः ॥ गंधहेतुत्वे कालादौ गतमतो व्याचष्टे । गंधेति । गंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थस्तेन
सुरभ्यसुरभिकपालारब्धानि गंधघटे नाव्याप्तिः । एतेन न जलादावतिव्याप्तिः । द्रव्यव्याप्येत्यनेन
तत्रैव सत्तामादाय सत्ता । न वा जातिपदोपादाना जलपृथिव्यन्यतरत्वमादाय । गंधवत्त्ववृत्तित्वं च
समवायेन । तेन कालिकसंबंधेन गंधवद्वृत्तिसमवायसंबंधावछिन्नवृत्तिमज्जलत्वादिमति पृ
थिवीनिरूपितकालिकसंबंधावछिन्नवृत्तित्वमज्जलत्वादिमति जलादौ नातिव्याप्तिः । प्रमाणाप
न्यासायेति । यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणांतरापेक्षा तथाप्ययोग्यसाधारण्येन प्र
त्यक्षासंभवात्साधारण्येन पृथिवीत्वासिध्यर्थं तदुपन्यास इति भावः । अन्यथा गंधत्वावछिन्नं
प्रति पृथिव्या हेतुत्वानंगीकारे । आकस्मिकोत्पत्तेरिति । नियतकारणानियम्यत्वापत्तेरि
त्यर्थः । तथा च कार्यमात्रवृत्तिगंधत्वस्य कार्यतावछेदकत्वानुरोधेन तदवछिन्नत्वे पृथिवीत्वे

मुक्ताप्रका नहेतुत्वं आवश्यकमिति भावः। इदमुपलक्षणं। रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिर्द्रष्टव्या। रा
प्रतियोगितासंबंधेन। अयनाशं[illegible]जन्यरूपनाशं प्रति स्वसमवायिपृथिवीत्वसमवेतत्वस्वहेतुरूपोभयसंबंधे लो
१ न विलक्षणतेजःसंयोगत्वेन हेतुत्वात्पृथिवीत्वस्य तादृशनाशकतावच्छेदकसंबंधघटकत्वात्॥ आमस्यनाशजन्यरूपनाश
व्यभिचारवारणायाजन्यांतं। नाशविशेषणं॥ घटाग्निसंयोगेन पटरूपनाशापत्तिवारणाय समवेतत्वांतं। तस्यनाशक
तावच्छेदकसंबंधेप्रवेशः॥ तेजोरूपनिरूपितप्रतियोगितासंबंधेन तादृशरूपनाशापत्तिवारणाय तद्घटकतया पृथिवीत्वप्रवे
शः॥ स्वसमानाधिकरणरसगंधादिप्रतियोगितासंबंधेन तादृशनाशापत्तिवारणाय स्वहेतुरूपत्वस्य नाशकताव
च्छेदकसंबंधेप्रवेशः॥ स्वहेतुत्वं च कालिकविशेषणतया बोध्यं॥ स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबंध
त्वेरूपत्वविशिष्टसमवायिसमवेतत्वमादाय विनिगमनाविरहेण नाश्यनाशकभावद्वयापत्तेरिति तत्परित्यागः॥ एते
न पाकजगंधे तेजःसः कारणत्वेनापाकजे च सुरभ्यादिगंधावयवगतसुरभ्यादेर्नियामकत्वेन गंधत्वेन पृथिवीत्वे
न कार्यकारणभावमानाभावात्पृथिवीत्वं न जातिरिति प्रत्युक्तं। ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे पाषाण १
णादौ गंधशून्येति व्याप्तिरित्याशंकां निराकुरुते। न चेत्यादिना। तत्रापि पाषाणादावपि पृथिवीत्वेनेति शे

९॥ गंधसत्त्वात्। गंधानुमानात्। ननु पाषाणादौ गंधसत्त्वे नुपलंभो न स्यादित्यत आह। अनुपलब्धिस्त्विति। अनुपल
ब्धिस्तु अनुत्कटत्वेनानुद्भूतत्वेन। ननु पाषाणस्य पृथिवीत्वस्वमानाभावो नितरां तदधीनगंधवत्त्वइयतस्त
त्र पृथिवीत्वसाधनाय भूमिकामारचयति। कथमन्यथेत्यादिना। अन्यथा पाषाणादौ पृथिवीत्वानंगीकारे तद्भस्मनि पाषाणभस्म
नि। यद्यपि पाषाणे पृथिवीत्वाभावे लक्ष्यत्वादेव न तत्र गंधवत्त्वलक्षणं नाव्याप्तमित्यर्थः तत्र गंधसाधनाय परिश्र
मः तथापि वस्तुस्थितिमनुरुध्य तद्दृष्टितथोक्तमिति बोध्यं। पाषाणभस्मनि गंधः प्रत्यक्षसिद्धः तेन तत्र
पृथिवीत्वमंगीकरणीयं। ततश्च भस्मारंभकावयवेष्वपि पृथिवीत्वसिद्धिः। ततश्च पाषाणारंभकावयवे
ष्वपि पृथिवीत्वमंगीकरणीयं। भस्मारंभकपाषाणारंभकावयवयोरैक्यादेव पाषाणस्यापि पृ
थिवीत्वसिद्धिरित्यभिप्रायः। तदेतद्विशदयति। भस्मनो हीति। एतेन पाषाणइव तद्भस्मन्यपि अनुद्भूतगं
धापत्तिवारणाय पाषाणावयवेनुपाकांगीकार आवश्यकः॥ एवं ~~[illegible]~~ दितगंधवद्भिः पार्थिवा

रूपनाशेति। अत्रापि प्रतिपदव्यावृत्तिः पूर्ववद्बोध्या। षड्विधस्तु रसस्तत्रेति मूलोक्तं षड्विधत्वं प्रकाशयति। मधुरेत्यादिना। ननु
नानारसानां संस्कारस्तत्राव्याप्तिरित्यत आह। अत्रापीति। ननु मूले गंधस्तु द्विविधो मत इत्यनेन द्विविधगंधवत्त्वं पृथिव्याः
लक्षणं प्रदर्शितं तत्रायुक्तं। द्वैविध्यांशस्यैव वैयर्थ्यमाह। वस्तुस्थितीति। वस्तुगत्या गंधो द्विविधस्तिष्ठतीति सूचयितुमुक्तं।
न तु लक्षणे द्वैविध्यस्यापि प्रवेशः। गंधद्वैविध्यं प्रकाशयति द्वैविध्यं चेति। अनुष्णाशीतत्वस्यैव वैयर्थ्यादाह। इत्थं चेति
पाकजस्पर्शवत्त्वमेवोक्तोऽर्थः। न्यायमते पाकजस्पर्शाभाववति पटे यो वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव
विद्यमानत्वादवयविनि भागासिद्धिमाशंक्य निषेधति। यद्यपीति। पाकजस्पर्शेति। घटादावित्यादिपदेन वैशे
षिकमते अवयविमात्रग्रहः। सत्ताजातिमादाय गगनादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। द्रव्यत्वसमानाधि
करणसत्तामादायातिव्याप्तिवारणाय व्याप्यभागः। स्पर्शसमानाधिकरणजलत्वादिकमादाय जलादावतिव्या
प्तिवारणाय पाकजेति। पाकजद्रवत्वसमानाधिकरणतेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय स्पर्शेति। जल
पृथिव्याद्यन्यतरत्वमादाय जलादावतिव्याप्तिवारणाय जातीति। अत्र पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वाल्लक्षणत्वं न सं

भवतीति तत्परित्यागः। वस्तुतस्तु पृथिवीत्वजातिरपि पृथिव्याः लक्षणं। न च व्यतिरेकसहचारेण व्यतिरेक
व्याप्तिरेव गृह्यते। इत्याचार्यमते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यं। हेतुसाध्यसमानाधिकरण इति
ज्ञानेपि हेतुमान् साध्यवानिति बोधस्याविषन्नत्वेन पक्षतावच्छेदकत्वेपि सम्भवात् हेतुत्वाविरोधात्
व्यतिरेकव्याप्तेरगमकतायां सुतरां अणुत्वस्य द्व्यणुके सत्त्वादाह। परमाणुरूपेति। बौद्धः शंकते। नन्वि
ति। ननु अयं घट इत्यादिप्रतीतिरेव वस्तुतस्त्वप्रमाणं भविष्यतीत्यत आह। परमाणुपुंजैरेवेति। विलक्ष
णसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः। उपपत्तेरिति। अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः। तत्समू
हस्य परमाणुसमूहस्य। तत्र दृष्टांतमाह। यथेति। तत्समूहस्य केशसमूहस्य। अनुपपत्तेरिति। परमाणूना
मनेकत्वादणुत्वाच्चेति भावः। इतिवदुपपत्तेरिति। अत्र धान्यसमूहस्य एकत्वादिकमिति प्रतीतिः॥
रूप एवं संयोगविशेषस्यैव महत्त्वतया महानिति प्रतीतिस्तथा परमाणुपुंजेप्यपीति भावः। प्रत्यक्षत्वायो

८ नच महत्त्वाभावस्य बाधकः। परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात्। नच परमाणूनां नित्यत्वाद्दृष्टादावुत्पत्तिं विना नाशयोः प्रतीत्यनुपपत्तिरिति वाच्यं। तन्मते पदार्थमात्रस्य क्षणिकतया परमाणूनामुत्पत्तिनाशयोः स्वीकारात्॥ ८॥

मुक्ता० गादिति। तथाच स्वभावतो योग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न संभवतीति भावः। दूरस्थ प्रकाश
४ केशास्तु स्वभावतो नातींद्रिय इति त्वदुक्तदृष्टांतवैषम्यमाह। दूरस्थकेशास्त्विति। तस्यैवेत्यर्थः। तस्य दू
रस्थकेशस्यैवकारस्तत्तच्छब्दप्राक्तनपदेन नान्वेति। तथाच सन्निधानप्रत्यक्षत्वादित्यर्थः। तथा
च दूरत्वस्य प्रतिबंधकत्वात्तद्दशायामप्रत्यक्षत्वमात्रं तस्य। नतु तस्यैवाप्रत्यक्षत्वमिति भावः। उत्पन्नत्वादि स्वाभाविकम्
ति। क्षणभंगवादिनां तेषां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः। अन्यथा अदृष्टस्य स्यदृष्ट्यो
पपादकत्वे तत्रादृष्टस्य दहनोत्पत्तिस्थले। तदुक्तं पातिभिः अतिजघेते त्वांतः पातिभिः स्वभावात्। कार
णतेरपेक्ष्यात्। उद्भूतरूपादिति। आदिनालोकादिपरिग्रहः। तदभावे महत्त्वोद्भूतरूपाद्यभावे ४
। तदभावादिति। महत्त्वाभावादित्यर्थः। अत्र नास्तिकमतानुयायिनः। परस्परविभक्तपरमाणू
नां महत्त्वाभावादप्रत्यक्षत्वेपि परस्परसंयुक्तानां पुञ्जात्मनां तेषां प्रत्यक्षे बाधकाभावः। नच

तिवाच्यं। दध्नो द्व्यणुकातिरिक्तदुग्धध्वंसजन्यत्वस्वीकारात्। द्व्यणुकरूपदुग्धध्वंसजन्यत्वेपि तस्य न तत्र व्यभिचारः। तदुपादान
परमाणुजन्यत्वस्य तदन्यि सत्वात्। नच दुग्धपरमाणुजन्यत्वे तद्दध्नोपि दुग्धत्वापत्तिरिति वाच्यं। दुग्धपरमाणौ दुग्धत्वाभावा
द्द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वेमानाभावात्। अन्यथा परमाणुस्वरूपदुग्धजन्यत्वे
तद्दुग्धत्वापत्तिवारणसंभवात्। दुग्धत्वदधित्वयोः परमाणौ जातिसंकरप्रसंगादिति। व्याप्ति
बोधार्थं दृष्टांतमाह। दृष्टं चेत्यादिति। मूलेनानारूपवत्वं लक्षणांतरमुक्तं। तद्दुक्ष्य प्रतिपा
दयति। रूपत्वव्याप्यादिना। अलक्ष्ये लक्षणासत्वं प्रतिपादयति। नचेति। रूपद्वयेति। रूपद्वय
वद्वृत्ति सत्तारूपजातिमति गुणादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। द्रव्यत्वव्याप्य जलत्वादि
मति जलेतिव्याप्तिवारणाय रूपद्वयवद्वृत्तीति। जलपृथिव्यन्यतरत्वमादाय जलादावतिव्याप्ति
वारणाय जातीति। अपेक्षाबुद्धिविशेषविषयत्वरूपा द्वित्वादिघटितत्वेन गोरवादह

परमाणुपुंजेषु घटत्वांगीकारे कपालाद्घट इति प्रतीत्यनुपपत्तिः। परमाणूनां कपालजन्यत्वाभावादिति वा
च्यं। तन्मते कपालस्यापि परमाणुपुंजतया घटरूपपुंजेक कपालरूपपुंजजन्यत्वस्वीकारात्। पुंजा
त्पुंजोत्पत्तिरिति तेषां सिद्धान्तादित्याहुस्तन्न। घट इति प्रतीतिविषयतायाः अनेकपरमाणुष्क कल्प
नेगौरवात्। अतिरिक्तावयविसिद्धेरिति दिक्। मेरुसर्षपयोरिति। अपिच साम्यप्रसंग इत्युक्तं संब
ध्यते। तेन द्व्यणुकस्य सावयवत्वे च सत्वे महत्वापत्तिः समुच्चीयते। साम्यं परिमाणतारतम्याभावः
परिमाणकारणीभूताया अवयवसंख्याया उभयत्र साम्यादिति भावः। नच मेरववयवानां सर्षपतु
ल्यपरिमाणवत्वं। नच सर्षपावयवानां सर्षपतुल्यपरिमाणवत्वं मियवयवपरिमाणाद्विशेष इति विशेषा
वाच्यं। मेर्ववयवसर्षपावयवयोरप्यनंतावयवत्वेन तत्परिमाणस्य तारतम्याभावस्याप्यापादनीय
त्वात्। नच मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यं। प्रचयविशेषस्या

मुक्ता पि संख्याविशेषस्य नियम्यत्वेन संख्याविशेषाभावेन तद्विशेषानुपपत्तेरिति। ननु तथापि विश्रामाश्रयस्यापि
५ नित्यत्वे मानाभाव इत्यत आह। यत्र चेति। असमवेतकार्योत्पत्तिप्रसंगादिति। असमवेतभावका
र्योत्पत्तिनियामकाप्रसंग इत्यर्थः। ननु तस्य नित्यत्वसिद्धावपि अवयवत्वे किं मानमित्यत आह। म
हत्परिमाणेति। चाक्षुषद्रव्यत्वादिति। अत्रात्मनि व्यभिचारवारणाय चाक्षुषपदं। घटाभावे व्यभिचारवारणा
य द्रव्यपदं। तदवयवसिद्धाविति। त्रसरेण्ववयवसिद्धावित्यर्थः। तदसिद्धेरिति। अवधारायासिद्धेरित्यर्थः यव
अत्र न्यायः। त्रसरेणोरवयवाः सावयवा इत्यनुमानयोरप्रयोजकत्वेन त्रुटावेव विश्रामः। न च चाक्षुषं
प्रति महत्त्वं कारणं। तथा त्रुटौ महत्त्वमावश्यकं। तच्चावयवसंख्याजन्यमित्यवयविनो सिद्धत इत्यनुकू ५
लतर्कसत्त्वान्नाप्रयोजकत्वं। द्व्यणुकसाधकानुमानस्येति वाच्यं। त्रसरेणुमहत्त्वस्य नित्यत्वस्वीका
मनहार रेणाकूलतर्कानवतारात्। न चाणुपरिमाणस्याणुपरिमाणनिबंधनतया तदाश्रयद्रव्यसिद्धिरावश्यकी।

णानां द्व्यणुकत्वमेव युक्तं अणुद्वयारब्धत्वे लाघवादिति। मूलस्थस्य देहमिन्द्रियं विषयस्तथा। यस्य त्रैवि
ध्यहेतुपरत्वं सूचयन्नाह। सा कार्यरूपेति। योनिजं शुक्रशोणितपरस्परमेलनजन्यं। जरा
चर्म युजमिति। गर्भवेष्टनपुटकं जरायुः। मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः। सर्पादीना
मित्यादि विहंगादीनां परिग्रहः। स्वेदजमुदाहरति। किमिदंशाद्याइति तच्छरीराणामुत्पत्तिर्धर्म
विशेषसहिताभ्यो अणुभ्य एव स्यादिति भावः। उद्भिज्जादिकमित्यादिना देवादिशरीरप
रिग्रहः। तेषामयोनिजत्वे चागम एव ब्रह्मणो मानसा मन्वादयः पुत्रा इत्यादिप्रमाणं। योनिवि
नानशरीरमित्येवं विधागमेन च योनिपदं कारणमात्रपरं। शरीरपदं मनुष्यदेहपरं। गंधादी
त्यादिना शुक्रत्वं। तरुरूपपरिग्रहः। कृदोष्मादेरित्यादिना व्यूहावकाशपरिग्रहः। कल

वत
दक्षरणं स्वेद इति यो। कुम्भपाक इति कर्तामि: ओव्यामिति यावत्। तच्छरीरसंबंधेन पुष्पादौ रूपादिपरा
वृत्त्यानुमीयते। अनुष्णात्तदनुत्तः। व्यूहः क्रियावकाशो मुखादावभ्रादिगतमप्रतिबंधकः। ननु श
कथं तर्हि शरीरे पांचभौतिकत्वव्यवहार इत्यत आह। तेनेति। शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः
एवं च शरीरे पांचभौतिकत्वव्यवहारो न पंचभूतोपादानकत्वनिबंधनः किंतु पंचभूतजन्यत्व
निबंधनः तत्राप्येकैकस्योपादानत्वं चतुर्णां निमित्तत्वमिति विवेकः। किंतु चेष्टेति।
चेष्टावत्त्वं जातिविशेषश्चेष्टात्व इति प्रसक्तस्य सिद्धः। न च शरीरत्वमेव पृथिवीत्वव्याप्यजा
तिः। चेष्टावत्त्वं तत्त्वं क्रियात्वमिति वाच्यं। पृथिवीत्वादिना संकरेण पृथिवीत्वादिव्याप्यानेकश
रीरत्वकल्पने गौरवात्। आध्यात्मिकेति। आध्यात्मिकवायुः प्राणाख्यः। शंकते नन्वेवेति।।

विन्याय

मुक्ताप्र ७ भग्नक्षतेति। भग्नक्षतयोर्विभागेन विश्लिष्टावयवयोः संरोहणं। आदिना पृथिवीसंग्रहः। पृथिव्यवयवोपच कारा
यः। तदुन्नयनादिति। आध्यात्मिकवायुसंबंधानुमितेः। ननु भग्नक्षतसंरोहणादिहेतु। वायोः प्राणत्वे
मानाभावइति चेन्नर्मदातीरसंजाताः सरलार्जुनपादपाः। नर्मदातोयसंसर्गात्ते यांति परमां गतिं
।गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कंकगृध्रोपसेवितः इत्यागम
स्यैव मानत्वात्। अंत्यावयविनेति। द्रव्यानारंभकद्रव्यत्वेनेत्यर्थः। मलत्वाशरीरे चेष्टाया अभा
वेनाव्याप्तेरत आह। अथवेति। घटत्वमादाय घटेतिव्याप्तिवारणाय चेष्टावदिति। हस्तादाव
तिव्याप्तिवारणायवांत्यावयवीति। न च हस्तत्वादिकं न जातिः पृथिवीत्वादिना संकरादिति ७
वाच्यं। पृथिवीत्वादिव्याप्यजातीनां हस्तत्वांगीकारात्। पृथिवीत्वव्याप्यनानाजातिमत्

त्त्विवाच्यं। तस्यापकृष्टपरिमाणनिबंधनत्वात्। महत्यपि महत्तमादणुव्यवहारात्। न चैवं परमाणुपुंज एवास्त्वव
यवीतिवाच्यं। विरलकलितस्वपितेषु घटद्वयादिप्रत्ययप्रसंगात्। ननु तत्संयोगस्यैव घटोऽयं घटो द्रव्य
मित्यादिप्रतीतौ च परंपरया तद्भानेमिति वाच्यं। संभवति साक्षात्संबंधविषयकत्वे परंपरासंबंधविष
यकत्वकल्पने गौरवादित्याहुः [illegible]। ननु परमाणुत्रयेण कुतो न द्रव्यांतरोत्पत्तिः। परमाणुद्वयेन द्व्य
णुकवदेवं द्व्यणुकद्वयेन द्रव्यांतरोत्पत्तिः। त्रिभिर्द्व्यणुकैस्त्र्यणुकवदिति चेन्न। प्रमाणाभावेन तादृ
शद्रव्यासिद्धेः परमाणुत्रये द्व्यणुकद्वये च द्रव्यारंभकसंयोगकल्पनात्। अत्रेदं चिंत्यं। त्रिभिः परमा
णुभिरेकं त्र्यणुकमस्तु। परमाणुभ्यामनारंभस्तत्सिद्धांतिना द्व्यणुकाभ्यामनारंभइवमानाभा
वात्। फलबलेन त्रयाणामेव युगपद्द्रव्यारंभकसंयोगकल्पनात्। वस्तुतो गवाक्षरंध्रे दृश्यमा

सर्वसिद्धत्वात्। ~~तदर्थत्वात्~~। हेतुवाक्यघटक ~~समभिव्याहृत~~ मध्यात्पदसमभिव्याहृतैवकारार्थत्वात्
तथाच दृष्टान्ते स्वीयरूपादिव्यंजके घृतादावसिद्धिवारणाय परकीयपदं तं रूपादौ विशेषणं देय
मिति भावः। तस्येति। नवशरावगंधव्यंजकजलस्येत्यर्थः। नच नवशरावगंधव्यंजकजलेन स
कुरसनाभिव्यंजकत्वं तत्र जलविशेषणेनैकोनइति वाच्यं। परकीयरूपादिविषयकसाक्षात्का
रस्वरूपायोग्यत्वस्यैव विवक्षितत्वात्। नवशरावगंधव्यंजकजले विरसव्यंजकत्वावच्छेदके
जलत्वस्य सत्त्वादिति परकीयेति। विशेषणाभवे रोनलापवादाह। द्वयेति। तद्दानेहेतुमाह।
वायूपनीतेति। इदमत्र बोध्यं। रूपाद्यव्यंजकत्वे सति तीयस्य हेतुत्रयेतात्पर्यं। शब्दाव्यंजकत्वे स
ति गंधाव्यंजकत्वस्य नवशरावगंधव्यंजकोदके व्यभिचारेण गंधकत्वे सत्यसर्याभावात्। त
न्हेतुक रूपरसस्पर्शानां परकीयत्वं विशेषणं। नच प्रथमहेतौ नवशरावगंधव्यंजकजले व्यभिचारः

हे तच

स्तुसाक्षरमबीनीलव्यंजकत्वात्। नचतृतीयेतोव्यभिचारः। एतदस्वरसेनापिथहेतिकल्पान्तरप्रण
यनात्। तत्रापि परकीयविशेषणा अघातितं हेतुत्रयमिति। तत्र घ्राणेन्द्रियसन्निकर्षे। इंद्रियत्वं न जा
तिस्तेजस्त्वादिना संकरात्। किंतु शब्देतरेत्याद्विनावक्ष्यमाणं बोध्यं। ननु विषयत्वं न जातिः सा
मान्यादौ सत्त्वादत लक्षणमाह। उपभोगेति। यद्यपि साक्षाद्भोगसाधनत्वं द्व्यणुकाव्याप्तं साक्षात्प
रंपरसाधारणं तु साधनत्वं परमाण्वादावपीति। द्व्यणुकादिब्रह्मांडांतमिति ग्रंथविरोधस्तथापि
साक्षात्परंपरासाधारणभोगसाधनत्वं विवक्षितं। परमाणुरपि विषय एव। कार्यरूपपृथिव्या
एवं त्रिधाकारेण विभजनात्। कार्यपृथिवी विषय एव। द्व्यणुकेत्यात्यादिना प्रदर्शितइति ग्रंथ
विरोधः। अत एवोक्तं। तदुपभोगसाक्षात्परंपरया वा जनयत्येवेति। कार्यजातमित्यत्र जातप
दं संपालयति। अदृष्टाधीनमिति। अत्र कार्यमात्रे प्रति अदृष्टस्य हेतुतामसमवायसंबं

मुक्ता०प्र० धेन। घटादिकरणकपालादौ समवायेन तदभावाद्व्यभिचारात्। अदृष्टमात्मनिष्ठं स्वसमवायिसंयोगेनादृष्टं का
९ र्यमात्रे हेतुरिति। तन्न। शब्दरूपकार्याधिकरणगगने दृष्टसमवाय्यात्मसंयोगाभावेन व्यभिचारात्। परंतु
स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या॥ इदं तु बोध्यं॥ अदृष्टस्य कार्यमात्रं प्रति हेतुता न साक्षात्॥ न
हि सामग्रीसमवधानेऽदृष्टविलंबेन कार्यविलंबो दृष्टः॥ येन तत्साक्षात्स्यात्। परंतु सामग्रीसंपादकतया प्रायः
परंपरयैव तदुपयोगः। क्वचित्तु मेघसंचारादौ साक्षादेव तद्धेतुरन्यथा सामग्रीसंपादकस्यैवानुपपत्तेरिति॥ एतद
र्थमेव साक्षात्परंपरासाधारणजन्यत्वबोधकमधीनपदमुपात्तं। यददृष्टाधीनं। यत्पुरुषीयादृष्टाधीनं तत्कार्यमि
त्यर्थः। तदुपभोगसाधनं। तत्पुरुषस्योपभोगसाधनं। तेन द्व्यणुकादिकार्यस्य तत्पुरुषोपभोगसाधनत्वेन। नन्वे
वं सर्वस्यैव विषयत्वेन शरीरेंद्रियविषयभेदेन पृथिव्यास्त्रैविध्यं न सिध्येदत आह। शरीरेंद्रियेति। इति पृथिवीग्रंथः। ९
॥ ॥ ७ ॥ जलत्वजातौ प्रमाणमाह। स्नेहेति। कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावात्तस्य च जातित्वमिति भावः

घटादावतिव्याप्तेर्लक्षणांतरमाह। अंत्यावयवीति। अंत्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वादिजातिव्युदासः।
चेष्टावत्त्विति। हिताहितप्राप्तिपरिहारार्थक्रियाख्याद्या। ननु स्पंदमात्रे। घटादावपि सत्त्वात्। ननु देवत्वा
दि जातिमादाय लक्षणसमन्वयः स्यात् अत आह। अतीन्द्रियेति। देवत्वस्यापीति। अपिना नृसिंहत्वपरि
ग्रहः। जातित्वाभावादिति। जातिसांकर्यादिति भावः। जातिसांकर्यस्यादोषत्वे देवत्वश
रीरत्वादिना जातित्वांगीकारे देवत्वशरीरत्वजातिमादायैव लक्षणसमन्वयः इति ध्येयं।
रूपादिमध्ये इति। रसगंधस्पर्शा आदिपदार्थाः। ननु रसत्वगंधत्वव्यंजकत्वेन सिद्धव्यभिचा
रवारणायैवकारः। तद्दाने च सक्तुरसस्य व्यंजकत्वान्न दोषः। घ्राणेंद्रियगंधत्वाभिव्यंजकत्वा
देव प्रसिद्धिवारणाय हेतौ मध्यान्तं। न चाप्रसिद्धिवारकं यद्विशेषणं निरर्थकमिति वाच्यं। व्यभिचा
रज्ञान इव हेतावप्रसिद्धावपि व्याप्तिज्ञानाभावेन व्याप्तिग्रहोपयिकाप्रसिद्धिवारणोपपादनस्य

जातिसिद्धिः॥ कार्यतावच्छेदककारणतावच्छेदकयोरैक्येपि स्वभावान्नियसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषा
भावाद्बोध्यो हेतुः॥ न चेति॥ पृथिव्यादावतिव्याप्तेरिति शेषः॥ रूक्षरूपस्य लक्षणत्वेपि न क्षतिरित्यभिप्रायेणाह। अथ
वेति। द्रव्यत्वव्याप्यवायुत्वजातिमादाय वायावतिप्रसंगाभावात्। रूपत्ववद्वृत्तीति। यथा वायुत्वं न जातिस्तथा
ग्रे वक्ष्यते। पृथिवीत्वजातिमादाय पृथिव्यादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। साक्षादिति
पटत्वादिवारणाय द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वमात्रं। ननु द्रव्यत्वव्याप्यत्वस्यापि तत्रा
न्तर्भावः। रूपवद्वृत्तित्वविशेषणेनैव रूपत्वादीनां वारणात् तन्निवेशे प्रयोजनाभावात्। यद्यप्येवं रूपे पार्थि
तिकद्रवत्वस्यैव रूपस्थाने प्रवेशो युक्तः। तथापि वायुत्वादेर्वारणात्। एवं च द्रवत्ववद्वृत्तित्वाभावादेव
घटत्वादीनां वारणसंभवे द्रव्यत्वसाक्षाद्व्याप्येत्यपि न देयमिति लाघवं। तथापि मूले वर्णैः रूक्षदुत्यादि
नारूपघटितलक्षणस्यैवोक्तत्वात् तद्घटितलक्षणपरिष्कारे मूलविरोधस्स्यादिति। तथा नक्तमि
तिवाबोध्यं। मूर्त्तत्वजात्यनभ्युपगमेनैवेदं तेन जलत्वस्य द्रव्यत्वव्याप्यमूर्त्तत्वेपि न क्षतिः। जलघटान्यतरत्वमा

दायघटादावतिव्याप्तिवारणाय जातीति। क्वचिद्रूक्षरूपवद्वृत्तीति पाठस्तत्र रूक्षपदं रूपपदं वा संपातायातं। एवमे
वच्याख्यातिरभास्वररूक्षेतररूपे यत्र रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोर्बोध्या। पृथिवीत्वमादाय पृथिव्याम
तिव्याप्तिवारणायाभास्वरशुक्लेतररूपासमानाधिकरणेति। जलत्वस्य रूक्षेतररूपसमानाधिकरणत्वाद
संभव इति। रूक्षेतरेति। तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणायाभास्वरेति। शीत एवेति। यद्यपि शीतं गुण
इति कोशात्क्लीबत्वेनोचिता तथापि विशेष्यस्पर्शशब्दस्य पुल्लिंगत्वात् तल्लिंगतया निर्देशः। रूक्षरूपमसा
यैवेदो रूक्षपदस्य क्लीबत्वेति। द्रव्यत्वव्याप्यपृथिवीत्वजातिमादाय पृथिव्यामतिव्याप्तिवारणायेति क्वचिद
वृत्तीति। तेजस्त्वादिजातिमादाय तेजआदावतिव्याप्तिवारणाय मधुरवद्वृत्तीति। शेषं दर्शितं। शावसेयं शी
तेतरेति। द्रव्यत्वरूपजातिमादायातिप्रसंगवारणाय शीतेतरस्पर्शवद्वृत्तीति। आमत्वादिकमादायातिव्या
प्तिवारणाय स्पर्शवद्वृत्तीति। शेषं पूर्ववत्। ननु जले नीलरूपाभावे कथं नीलरूपप्रतीतिरित आह। कालिंदी
ति। स्वसमवायिसंयोगसंबंधेन उपष्टंभकपार्थिवभागगतनीलरूपप्रतीतिः कालिंदीजलादाविति भावः

मु॰का॰ प्र अत एवेति॥ उपदर्शितसंबंधस्य जलनीलमितिप्रतीतिनियामकत्वादेवेत्यर्थः॥ विषयतीति॥ तदोपदर्शितसंबंधघटकसं
११ योगस्यनाशादितिभावः॥ तत्र जले। तस्य माधुर्यस्य। अन्यथा। आश्रयोपाधिकत्वाभावे व्यंजकत्वादिस्वीकारे हरीतकी
भक्षणोत्तरप्रत्यक्षेण माधुर्योपलंभादितिपूरणीयं॥ कल्पनागौरवादिति॥ अवयवरसाजन्यस्य पृथ्वीरसस्याग्निसंयो
गसाध्यत्वदर्शनेन तदनुरोधेमात्रेण जलसंयोगस्यापि पृथ्वीरसोत्पादकत्वस्वीकारेऽतिरिक्तकार्यकारणभावस्य हरीत
क्यां मधुररस्य च कल्पने गौरवादितिभावः॥ ननु स्वतः जले मधुरो रसस्तथापि जंबीरजलादौ प्रत्यक्षसिद्धस्याम्लरसस्या
पि स्वीकारे बाधकाभावस्स्यात्तत्राह॥ पृथ्वीत्वस्येति॥ आम्लादिजनकतावच्छेदकत्वादिति॥ यद्यपि पृथ्वीत्वस्याम्लादि
जनकतावच्छेदकत्वं मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं॥ तथा हरीतकीभक्षणोत्तरं जलेपि मधुरोपलब्धेस्त
न्मधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुरं हेतुत्वं कल्प्यत इति भावः॥ ननु जंबीरसलिलादौ आम्लप्रत्यक्षेण ११
जलत्वेनाम्लादिरसेपि तुल्यवद्धेतुत्वं स्यादत आह॥ जंबीररसादाविति॥ स्वसमवायिसंयोगसंबंधेन जंबीरगताम्ल

निष्ठवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवतीति शंकते। यद्यपीति। तथा च कार्यता
वच्छेदकं। वस्तुतस्तु नित्यसाधारणस्य कार्यतावच्छेदकत्वे दोषाभावाज्जन्यपदं न देयमेव। ननु यथारण्यदंडादेः फलानु
था पधायके कारणतावच्छेदकेतया दंडत्वादिकं जातिस्तत्रापि नाविष्यतीत्यत आह। तस्येति। दंडादेः स्वरूपयोग्यता
याः नकापि क्षतिः॥ तस्यापि सत्त्वेन फलोपधायकत्वाभावादितिभावः॥ अन्यजलत्वजातिः। अन्यजलमात्रवृत्तिजातिः॥ तदवच्छिन्नेति॥
अन्यजलत्वजात्यवच्छिन्नेत्यर्थः॥ न चैवं जलत्वाद्यावयविनि जलत्वं न स्यादिति वाच्यं॥ जलस्यांत्यावयव्यनुपगमात्॥ ननु जलत्वाव
च्छिन्नं प्रति समवायसंबंधेन स्नेहस्यैव कारणतावच्छेदकत्वमस्त्वतिरिक्तजातिकल्पनापेक्षया लाघवादितिचेन्न॥ जलत्वावच्छिन्नं
प्रति स्नेहवत्त्वेन वा कारणत्वं गृहीतस्पर्शवत्त्वेन वेत्यत्र विनिगमनाविरहादतिरिक्तजातिसिद्धेः॥ क्रमसमादायकल्पनीयेन विनिगम
नाविरहादितिर्भावः॥ केचित्तु धूमादिकं प्रत्यार्द्रेंधनादेः कारणत्वं निर्विवादं। आर्द्रत्वं च जलयुक्तत्वं॥ तथा च जलसंयुक्तेंधनत्वेन भ
संयुक्तजलत्वेन वा कारणतेत्यत्र विनिगमनाविरहाज्जलेंधनयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरि
त्याहुः॥ परे तु स्थूलजलवृत्तिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारण

स्पर्शं शीत एव स्पर्श इत्युक्तं । न साधयति । तेजःसंयोगादिति । तत्र । ऽलि । निवेचयिष्यति पाकासंभवमुपरिष्टात् ।

मुक्ताप्रकाश चंदनादौ शैत्यो सत्त्वे व्यभिचारेण कथं जन्यजलत्वेन तत्र हेतुत्वमत आह । घृतेति । घृतादावित्यादिपदेन तैला
दिपरिग्रहः । जलस्यैव स्नेहस्तदनंतरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः । तेन घृतादौ समवायेन स्नेहनिरा
सेन । जलएवेति । स्नेहस्यावांतरविशेषाभावात् स नोत्कीर्तितः । तदवच्छिन्नजनकतावच्छेदकं जलत्वमि
परमा तिभावः । अथैवंरीत्याणुव्यावृत्तमाद्यणुकं जलत्वमेकं परमाणुसाधारणं द्वितीयमिति जले
त्वयोर्भेदे भेदाग्रहः कुत इति चेत् समनियतयोग्यव्यक्तिवृत्तित्वादिति । एवमग्रेपि । तैलादावित्यादिपदेन क्षीरपरिग्र
हो न तु घृतस्य । तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्वात् । द्रवत्वमि सनंतरं स्वाश्रयसंयोगेन प्रतीय
त इति शेषः । ननु तैले जलसत्वे तैलस्य दहनानुकूल्यं न स्यात् । जलस्य दहनप्रतिकूलत्वादत आह । स्ने
हप्रकर्षेणेति । प्रकृष्टस्नेहस्य जलस्य दहनानुकूल्यमेवेत्यर्थः । अपकृष्टस्यैव तस्य दहनप्रतिकूलत्वादिति भावः
इति वक्ष्यतीति भावः । स्नेहनिरूपणावसर इति शेषः । प्रथमवदिति । षष्ठीसमार्थाद्वतिरित्यभिप्रायेणाह । प

थिव्या इवेत्यर्थ इति । एवमग्रेपि । जलीयं शरीरमिति । तच्च पार्थिवावयवैरुपष्टब्धं बोध्यं । तेन जलमात्रे हस्त
पादादिव्यवस्थाया असंभवेपि न क्षतिः । ननु तादृशशरीरे मानाभावः अनुपलंभादित्यत आह । वरुणलोके ते
ति । कासारः सरः । करकाकादीत्यादिपदात् कूपादिपरिग्रहः । कठिनत्वादिति । कठिनस्पर्शवत्वादित्यर्थः
वीलीनस्य तस्येति । सप्तम्यर्थे षष्ठी । क्वचिद्विलीनयोस्तयोरिति पाठः । स तु [illegible]रेव विलीनतायाः
द्रवत्वरूपायाः जलत्वव्यंजकत्वादिति भावः । ननु विलीनता नैमित्तिकद्रवत्वमेव । तदुक्तं भूषणग्रं
ल थे । तच्च न जलत्वव्यंजकं । यदि च विलीने तस्मिन्नष्टे सतीत्यर्थः तथापि करकादिनाशोत्तरद्रव्यांतरोत्पा
दात्तत्रैव द्रवत्वजलत्वयोः प्रत्यक्षं । न करकायां । नष्टत्वादत आह । यद्द्रव्यमिति । तथापि करकादि
नाशोत्पन्नद्रव्यांतरोत्पन्नस्य प्रत्यक्षसिद्धत्वादुक्तव्याप्त्या करकादिषु जलत्वसिद्धिरिति भावः । न
नु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह । अदृष्टविशेषेणेति । इति जलग्रंथः ।।।

इत्थं चेति। उष्णत्वजातिसिद्धौ चेत्यर्थः। ननु तर्हि कथं जन्योष्णस्पर्शसमवायिकारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिरित्यत आ
व हा। नस्येति। तेजस्त्वस्येत्यर्थः। जलेस्येति वा। यथा जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजाति
१२ सिद्धिः। तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणौ तेजस्त्वरूपजातिसिद्धिरित्यभिप्रायः। इदमुपलक्ष
णं। समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं॥
चंद्रकिरणादाविति। आदिना रत्नकिरणादेः संग्रहः। तत्रापि। चंद्रकिरणादावपि। ननु तत्रौष्ण्यप्रतीतिः कुतो नेत्यत आह॥
किं त्विति। तदंतःपातिजलस्पर्शेनेति। चंद्रकिरणांतर्गतजलभागशीतस्पर्शेनेत्यर्थः। ननु चक्षुरादिनिष्ठोष्णस्पर्शस्य
केनाप्यननुभूतत्वात् तदसत्त्वापत्तिरत आह। चक्षुरादौ चेति। मरकतकिरणादाविति। आदिना सुवर्णस्यापि परिग्रहः। स्वा
रूपं रूपं भास्वरेतीतिमूलं। तत्र शुक्लेति स्वरूपकथनं। भास्वररूपस्य मात्रस्य लक्षणत्वे अतिप्रसंगाभावात्। भास्व १२
रत्वं जातिविशेषः स च तेजोरूपमात्रवृत्तिः। शुक्लत्वव्याप्यश्चेति। ननु रूपाविषयकप्रत्यक्षस्याभावात्। वैश्वान
रादेश्चाक्षुषत्वापत्तिरित्याशंकते। उद्भूतरूपाग्रहेति। वैश्वानरादेरचाक्षुषत्वे तद्गतसंख्यागुणानामपि चाक्षुषत्वं न स्यात्॥

के
रसप्रतीतिस्तद्गतजलत्वेनेत्यर्थः॥ क्वचित्(?) पि जंबीरे आम्लप्रतीतेस्तत्राम्लरसावच्छेदकत्वे तस्यैव तद्गतजले परंपरया प्र
तीतिः॥ हरीतक्यां तु मधुररसस्याभावान्न हरीतकीगतमाधुर्यस्य जले प्रतीतिरिति भावः॥ कर्कटकीभक्षणो
त्तरं जलपाने तिक्तरसस्यानुभवात् तिक्तरसो जलस्य स्यादिति तुल्यं। जलपानात् पूर्वमपि कर्कट्यां
तिक्तरसोपलब्धेः कर्कटकीभक्षणे रसनाग्रवर्तिपित्तक्षोभे तदीयतिक्तोपलब्धेर्बाधकसिद्धत्वात्॥ वस्तु
तो निर्दोषपात्रनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुरत्वमिति युक्तं॥ एतेन हरीतक्यादौ
न जलसंयोगेन माधुर्यमुत्पद्यते येन कल्पनागौरवं परंतु हरीतक्यां कषायवन्मधुररसोपि स्वीक्रियते॥ तद्व्यंजकश्च ज
लसंयोगः॥ ननु तद्गतरसांतरस्य फलबलात्॥ यद्धि चित्ररूपवत् चित्ररसमानाभावात् गुणविरोधेन नीरसे
व हरीतकीरसप्रतीतिस्तु अवयवेषु रससद्भावात्परंपरयाप्युच्यते॥ तदा तु जलसंयोगो हरीतक्यवयवगतमा
धुर्यस्यैव व्यंजक इत्यपास्तं॥ जलत्वजातावनुमानांतरं प्रमाणमाह॥ एवमिति॥ ननु जल[illegible]भावे घट

[redacted]स्यात्। योग्यमात्रवृत्तित्वाभावादित्यधिना -स्वबिनं। अन्यदीयरूपेणैव स्पर्शः। मतांतरमाह। केचित्त्विति।।
सुवर्णादिरूपे तेजसि सत्त्वादिति। तेन नासंभवादिति भावः। पृथिव्यवृत्तीति। नैमित्तिकद्रवत्ववद्वृत्ति द्रव्यत्वव्याप्यजातिमा
दाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्तीति। पृथिव्यवृत्तिनैमित्तिकमादाय वाय्वादावतिव्याप्तिवारणाय नैमि
त्तिकद्रवत्ववद्वृत्तीति। वायुतेजोन्यतरत्वमादाय वाय्वावतिव्यारणाय जातीति। परकीयस्पर्शादिति। गंधाव्यंजकत्वादि
घटितहेत्वंतरसूचनायादिपदेन गंधादिपरिग्रहः। चक्षुषः परकीयरूपादिव्यंजकत्वादसिद्धिवारणाय स्पर्शपदं। इह
केचिदाहुः। चक्षुर्विषयासंबद्धमेव ग्राहकं। यदि च प्राप्यकारि स्यात्तदा रसनादिवदधिष्ठानसंबद्धं गृह्णीयात्
।न चैवं। गोलकासंबद्धग्रहणात्। किंच यदि चक्षुः प्राप्य गृह्णीयात् तत्ताप्यधिकपरिमाणं न गृह्णीयात्। न
खलु नखरंजनिका परशुच्छेद्यं छिनत्ति। शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्च। गतिक्रमेण प्राप्य ग्र
हणे क्रमेण ग्रहणं स्यात्। न तु तुल्यकालमुपलंभः। अनुभवति हि उन्मीलयन्नेव नयनेन शाखां सीतमयूखं च। एवं
चप्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरंगीक्रियते।। गोलकस्य चंद्रादिप्राप्त्यसंभवात्।। अप्राप्य

मुक्ताप्र० कारित्वेन गोलकमेव चक्षुः तच्चनैतजसमिति तदसत् । अधिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभायाइव चक्षुषोपि कारा
प्राप्यकारित्वसंभवात् । पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभायाइवोपपत्तेः
१४ । स्वाधिकपरिमाणवद्द्रव्यादिग्रहणात् । त्वगिंद्रियेण व्यभिचारात् । तादृशनियमाभावाच्च । तुल्यकालग्रहणं चा
सिद्धमेव । तदभिमानस्य कालसान्निकर्षेणैवोपपत्तेः । अचिरस्योतिहि तेजसो लाघवातिशयेन वेगातिशयो यस्मात् चीना
चलचूडावलंबिन्येव भगवति मयूखमालिनि भवनोदरेष्वालोकः इत्यभिमानो लौकिकानां । यत्राहुः शालिः
काचार्याः । चक्षुर्बाह्यालोकाभ्यां आरब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचं १४
द्रुमसोमयोस्तुल्यकालग्रहणमुपपन्नमेवेति तन्न शोभनं । चक्षुर्बाह्यालोकाभ्यामारब्धस्य चक्षुषः पृष्ठभागेपि स
त्वात् पृष्ठभागस्थितपदार्थग्रहणापत्तेः । पृष्ठदेशस्थबाह्यालोकेष्वचक्षुरुत्पादमानाभानाभावात् इति चेत् तद्देशस्थ
बाह्यालोकेरपि तदुत्पादमानाभावात् । तदनभ्युपगमे पिचाक्षुषोपपादनस्य अनुपममुक्तत्वादिति । आमवादाह । अथवेति । तैजसत्वेपि मा
नमिति ।।।

मुक्ताप्रका थें हेतोः सत्वं मग्निसंयोगरहितपूर्वरूपविजातीयरूपानाधारघटे व्यभिचारवारणायात्र पृथिवीत्वं देयं । तेन जलप रा
रमाणौ न व्यभिचारः ।। यथा कथंचिदग्निसंयुक्ते घटेन तद्वारणाय स्येति ।। न चाऽयोजकत्वं विरोधिद्रवद्रव्यसंबंधं विनापा
१५ र्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादिति भावः ।। न च द्रवद्रव्याद्न्यदेव प्रतिबंधकं वाच्यं । अदृष्टकल्पना
पत्तेरिति ।। तस्य चेति । तस्य द्रवत्वस्य पृथिवीजलभिन्नस्येति । पृथिव्याः पक्षीकृतेपि तिमात्र यविजातीयचलाभा
वाऽजलस्य तत्रासंभवादिति भावः । तेजस्त्वनियमादिति । वाय्वादौ रूपाभावादिति भावः । न चांधकारे
पीतरूपाश्रयद्रव्यग्रहापत्तिः । सुवर्णरूपालोकसंयोगसत्वादिति वाच्यं । उद्भूतानभिभूतरूपालोकसं
योगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात्सुवर्णरूपस्य त्वभिभूतत्वात् । न च तदानीं पीतरूपस्याग्रहणे कृतं अग्र तेजाजीय
हणं न सुवर्णस्येति न तस्याभिभूतत्वादिति वाच्यं । लघुतया तेजातीयसंबंधस्यैव अभिभवपदार्थत्वात् ।
न च तथाप्यंधकारे सुवर्णसाक्षात्कारापत्तिः । तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येवालोकसंयोगस्य हेतुत्वादिति १५
वाच्यं । सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वादिति । नवीनास्तु सुवर्णं पार्थिवमेवपी

द्रव ।ति अनुष्णाशीतस्पर्शव

तं सुवर्णं द्रुतमिति साक्षात्संबंधेन द्रवत्वप्रतीतेर्भ्रमत्वायोगात् । द्रुतं द्रुततरमिति प्रतीतेर्द्रवत्वस्याप्युत्कर्षापकर्षतो भेदात् पृथिवीत्वस्य
पीतरूपसमवायिकारणतावच्छेदकत्वाद्रूपनाशे तादात्म्येन सुवर्णस्य विरोधित्वाच्च न पीतरूपनाश इति वदंति ।।।
इति तेजोग्रंथः ।। ।। वायोः प्रमाणं दर्शयितुं मूले पाकजोनुष्णाशीतस्पर्शस्तु पवने मत इत्युक्तं । तत्रापाकजादिपद
नां क्रमेण व्यावृत्तिमाह । अनुष्णाशीतस्पर्शेति । उत्क्रमपाकजेति । यद्यप्यपाकजानुष्णाशीतस्पर्शवत्वं घटादाव
ति व्याप्तं । तथाप्यपाकजानुष्णाशीतस्पर्शव्याप्यद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं । अपाकजानुष्णाशीतस्पर्शवै
त्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं वा तदर्थो । वस्तुतः । एतेन । स्पर्शस्यानुष्णाशीतत्वकथनेन । तज्जनकतावच्छे
दकमिति । तथा च विजातीयस्पर्शजनकतावच्छेदकतया वायुत्वजातिसिद्धिरित्यर्थः । इदमुपलक्षणं । शब्द
विशेषस्य वान्हित्वावच्छिन्नस्य वा निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरित्यपि ज्ञातव्यं । मूले स्पर्शादिलिं
गकेति । स्पर्शादीनि लिंगानि यस्य स तथा । मुक्तावल्यां धृतीति । धृतिश्च गुरुणाद्रव्यस्यापतनं । विजातीयस्पु
शेति । तृतीयांतं तुच्छमनुमानादित्यग्रेतनान्वितं । अनुमितिप्रकारस्तु । योयं रूपद्रव्यासमवेतस्पर्शः क्वचिदाश्रि
च

मुक्ता॰ तः। स्पर्शत्वात्। पृथिवी स्पर्शवद्। अत्र पृथिव्या व्यादि स्पर्शेऽसिद्धसाधनवारणाय रूपवद्द्रव्यासमवेतेति विशेषणं। एवमसति रूपवद्द्रव्या
भिघाते यो यं वेण्वादिषु शब्दसंतानः स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः। अविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वात्। दंडाभिह काशा
१६ तभेरीशब्दसंतानवत्। पृथिव्याद्यभिघातजन्मनि सिद्धसाधनवारणायासतीत्यादि विशेषणं। विभागजन्मनि शब्दे व्यभिचारवा
रणाय हेताव विभज्यमानेत्यादि। एवं नभसि तृणतूलस्तनयित्नुविमानादीनां धृतिः। स्पर्शवद्द्रव्यसंयोगहेतुका। अस्मदाद्यनधिष्ठितद्र
व्यधृतित्वात्। नौकादिधृतिवत्। जलादिगततृणादौ सिद्धसाधनवारणाय नभसीति। प्रयत्नसंयोगहेतुकधृत्यादौ व्यभिचारवारणा
रूपवत् यास्मदादीति। एवं द्रव्याभिघातमंतरेण तृणे कर्म। स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं। कर्मत्वात्। नदीपूराहतकाष्ठादिकर्मवदिति
अग्रे वक्ष्यत इति। अग्रे आत्मनिरूपणावसर इति शेषः। मत्पूर्वं वह्नित्वताद्युक्तमिति। पूर्ववत्। जलवदित्यर्थः। नियतादीत्यादि
नाः नियतपरिग्रहः। उक्तं बोध्यमित्यर्थः। एतदेव स्पष्टयति। मुक्तावल्यां वायुर्द्विविध इति। तत्रेति तेषु मध्ये। अयोनिजं। अयोनि
जमेवेत्यर्थः। पिशाचादीनामिति। मरुतां लोके प्रसिद्धमिति शेषः। ननु वायवीयाः स्ताल्वादि वाग्व्यापाराभावात्कारणाद्यभावेन चा
हरणविहरणाद्यभावात् कथं भोगायतनत्वमित्याह। परेत्विति। जलीयतैजसशरीरयोरपि आक्षेपस्य तुल्यत्वात्सकरणलाघव १६
मभिप्रेत्य साधारण्येन समाधानमाह। जलीयतैजसवायवीयेति। ननु तर्हि कथं जलीयत्वादिव्यपदेश इत्यत आह। जला
दीनामिति। अत्र त्वगिंद्रिये यो विशेषः। अधिष्ठानादिः। शरीरव्यापकमिति। न च नखलोमकेशानां त्वगिंद्रियाना

ति॥ सुवर्णं पार्थिवं नैमित्तिकद्रवत्ववत्त्वादित्यनुमानस्य पार्थिवत्वसाधकस्यैव सत्त्वादित्याशयः॥ समाधत्ते। नेति॥ न चात्रापीतरूपवद्द्रव्या
त्मकस्य सुवर्णस्य पक्षत्वे बाधः। तैजससुवर्णस्य चानुमानात्पूर्वमसिद्ध्या पक्षासिद्धिः॥ धर्मिशब्देनापीतिमद्द्रव्येऽपि सुवर्णपदप्रयोगेन
तस्यापि सुवर्णपदवाच्यत्वेन यासुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वेऽपि बाधतादवस्थ्यादिति वाच्यं। अत्यंतानलसंयोगेऽसत्यनु
च्छिद्यद्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे न पक्षतावच्छेदकेऽत्यंतेत्यादि प्रयुक्तस्य
सामानाधिकरण्येन सिद्धसाधनस्यादोषत्वात्। असति प्रतिबंधक इति॥ जलमध्यस्थ[?] ध्यमानघृतादौ व्यभिचारवारणाय सति
प्रतिबंधके इति। अग्निसंयोगनाश्यद्रवत्ववति घृतादौ व्यभिचारवारणाय संयोगेत्यंतं। नाद्यशब्दत्वस्य स्वसामानाधिकरणाग्नि
संयोगासमानकालीनत्वान्न व्यभिचारः। अनुच्छिद्यमानेत्यादि द्रवत्वादित्यस्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थो न तूच्छि
द्यमानद्रवत्वानधिकरणत्वादिति। गगनादौ व्यभिचारात्। पूर्वपक्षिणा शंकितामप्रयोजकतां निरस्यति। नचेति। अग्निसं
योगनाश्यत्वादिति। एतत्सापल्लक्षणं[?]। अग्नेरपत्यं प्रथमं हिरण्यमित्यागमान्यथानुपपत्तेरप्यनुकूलतर्कत्वादिति। ए
तेनाश्रयनाशजन्यद्रवत्वनाशे व्यभिचारवारणायाश्रयनाशनाश्यद्रवत्वव्यावृत्तजातिविशेषकल्पने विजातीयद्रवत्वनाशप्रत्य
ग्निसंयोगत्वेन हेतुता स्वीकार्या। न च स्वैजात्यं सुवर्णद्रवत्वे व्यावृत्तमपीति दर्शितानुकूलतर्कोऽसंगतः॥ सुवर्णस्य पृथिवीत्वेऽपि
तदीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदकानाक्रांततयाऽत्यंताग्निसंयोगसत्त्वेऽपि नाशापत्तेरसंभवादित्यपास्तो॥ सोऽदृष्ट
[illegible]॥ न स्यपीतिमगुरुत्वाश्रयप्रकारांतरेण सुवर्णस्य तैजसत्वं साधयतां मतमुपन्यस्यति। अपरे त्वित्यादिना॥ [illegible]
के। रूपपरावर्तेत्रप्रतिप्रतिबंधके। अग्निसंयोगस्य तैजससुवर्णेऽपि सत्त्वादुक्तं पीतिमेति॥ साध्ये विजातीयपदमुद्देश्यसिद्ध्य

घ

तिरिक्तैकग्रैव कर्तव्यं तल्लोकेनाग्रैवप्रसंगादुक्तपदमभिहितं। नजातिरिति। अनेकसमवेतत्वाभावादित्विशेषः॥
तेनैकव्यक्तिकत्वस्यजात्यभावहेतुत्वेवैयधिकरण्यमितिप्रयुक्तं। किंत्विति। आश्रयताचसमवायेनविवक्षिता। ते
नकालस्यजगदाधारत्वेनशब्दाश्रयत्वेपिनक्षतिः। मूलेवैशेषिकपदवैयर्थ्यमाशंक्याह। वैशेषिकेतीति॥ ए
इत्थंचशब्दइतिमूलंसावधारणंज्ञेयं। एतेनविशेषगुणकथनेनप्रमाणमित्यस्याकाशादुर्यादि। तत्रशब्दःपृथि
व्याद्यष्टद्रव्यानाश्रितः। अष्टद्रव्यानाश्रितत्वेसतिद्रव्याश्रितत्वादित्येवंरूपंबोध्यं। दर्शितंसूचितं। अत्रतुमान अनु
स्वरूपासिद्धिंपरिहर्तुमाह। तथाहीति। घटादौव्यभिचारवारणायचक्षुर्ग्रहणायोग्येति। आत्मनिव्यभिचा
रव्यावृत्तयेबहिरिंद्रियग्राह्येति। रसत्वादौव्यभिचारव्यावृत्तयेजातिमदिति। एतच्चानुमानमष्टद्रव्यस
मवेतत्वसाधकानुमानेस्वरूपासिद्धिनिरासायेतिबोध्यं। गुणत्वादिति। एतदनुमानेनोक्तपरिशेषानुमा
नेहेतोर्विशेष्यासिद्धिर्निरस्ता। विशेषणासिद्ध्युद्धारायाह। शब्दोनस्पर्शवद्विशेषगुणइति। नस्पर्शव
तोद्रव्यस्यपृथिव्यादिचतुष्टयस्यविशेषगुणइत्यर्थः। अकारणगुणप्रत्यक्षत्वादिति। अकारणगुणपू

क

र्वकत्वेसतिप्रत्यक्षत्वादित्यर्थः। हेतुसत्वंप्रतिपादयितुमुक्तं पाकजेति। जलपरमाण्विति। अनित्यानांपार्थिवरूपादी
नांकेषांचिदग्निसंयोगासमवायिकारणकत्वंकेषांचित्कारणगुणपूर्वकत्वादुपेक्षा। नद्विकालेति। शब्दइ
त्यनुवर्त्तते। बहिरिंद्रियेति। मनसोन्यदिंद्रियंबहिरिंद्रियं। तत्प्रत्यक्षत्वादित्यर्थः। एतेनात्मगुणग्राहकेंद्रियत्वं। तच्च
मनस्यपिअतिप्रसक्तं। तेनापिरूपादिग्रहणादितिनिरस्तं। इत्थंच। अनेनप्रकारेणपृथिव्याद्यष्टद्रव्याना
श्रितत्वसिद्धौचसिध्यतीति। पूर्वोक्तपरिशेषानुमानेनसिध्यतीत्यर्थः। नन्वेतत्सर्वंतदोपपद्येत। यदिशब्दस्य
विशेषगुणत्वेकिंचित्प्रमाणंस्यात्। तत्रैवचमानंनपश्यामइतिचेन्न। शब्दोविशेषगुणः लौकिकप्रत्यास
त्त्येंद्रियग्राह्यत्वेसतिलौकिकप्रत्यासत्त्याद्वीन्द्रियग्रहणायोग्यत्वात्। हेतुश्चसतिगुणत्वव्याप्यजातिमत्वादित्यनु
मानस्यैवतत्रप्रमाणत्वात्। प्रभात्वमादायव्यभिचारवारणायगुणत्वव्याप्येति। गुरुत्वमादायव्यभिचारवार
णायप्रथमंसत्यंतं। संख्यात्वमादायव्यभिचारवारणायद्वितीयंसत्यंतं। सांसिद्धिकद्रवत्वस्नेहधर्माध
र्मभावना। सुप्रकृतहेतोरभावयन्तत्रहेत्वं। तरणैवविशेषगुणत्वंसाधनीयमिति। पूर्वोक्तानुमानेबाधंस्त्व

मुक्ता०प्र० रूपासिद्धिं वारयति। नवेति। वायाविति। तथाच स्पर्शवद्वायुगुणत्वस्य तत्र तदभावासाधने बाध इति भावः। कारणगुणपूर्व
कत्वकथनं तु अकारणगुणपूर्वकत्वहेतोरसिद्धिप्रदर्शनार्थं। अयावद्द्रव्यभावित्वेनेति। स्वाश्रयनाशजन्यनाशप्रतियोगि
१८ यद्यत्तत्त्वादिभिन्नत्वेनेत्यर्थः। ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति तेनोपन्यस्तमिति चेन्न। चाक्षुषत्वप्रयोजकत्वस्य म
हत्त्वे सति उद्भूतरूपवत्त्वस्याकाशे संभवेन चाक्षुषप्रमाजनकत्वसंभवात्। ननु आकाशे न चाक्षुषत्वं देहपक्षीति चा
क्षुषाधिकरणत्वेन किं भासत इति चेदालोक एवेति कल्प्यं। नन्वाकाशीयशब्दस्य विषययोः प्रदर्शनमनादृत्यैव कथमि
न्द्रियप्रदर्शनं इन्द्रियं तु श्रोत्रमित्यनेन ग्रन्थेन क्रियते इत्याशंकयाह। तत्रचेति। आकाशे चेत्यर्थः। कर्णशष्कुलीमि
दादिति। चैत्रादिकर्णशष्कुल्यवच्छिन्नमाकाशं चैत्रादिश्रोत्रमिति भावः। नव्यास्तु। शब्दनिमित्तकारणत्वेन क्लृप्तस्ये १८
श्वरस्यैव शब्दसमवायिकारणत्वं। न चेश्वरस्य शब्दसमवायित्वं जीवस्य वा इत्यत्र विनिगमनाविरहः। जीवस्य
शब्दसमवायित्वे ज्ञानवच्छब्दस्याप्यभिमानसत्त्वापत्तेः। अदृष्टादिवत्प्रतिबन्धकत्वकल्पने चातिगौरवं। नचैवं कर्णशष्कु क
लीविवरावच्छिन्नस्याकाशस्य कथं श्रोत्रत्वोपपत्तिरिति वाच्यं। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तिरित्याहुः।
स्वतन्त्रास्तु मृदंगादीनामेव गुणः शब्दः शब्दं प्रति मृदंगत्वादिना समवायिकारणतायाः स्वीकारात्। प्राचीनैर

धारत्वादसंभव इति वाच्यं। तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात्। मूलस्थस्य त्वगिन्द्रियमित्यस्य त्वचि स्थितमिन्द्रियमित्य
र्थः। एतेन देहसहजावरणं त्वगित्युच्यते। तच्च पार्थिवं प्रत्यक्षसिद्धं चेति नेन्द्रियं न चावयवीयमिति परास्तं। त्वगिन्द्रि
यस्य लक्षणमाह। स्पर्शेति। कार्यमात्रजातककालादावतिव्याप्तिवारणायेन्द्रियमिति। चक्षुरादावतिव्याप्तिवारणा
य स्पर्शग्राहकमिति। त्वक् त्वगिन्द्रियमित्यर्थः। तच्चेति। त्वगिन्द्रियं चेत्यर्थः। पक्षे स्पर्शत्वाभिव्यंजकत्वादसिद्धिवारणाय
रूपादिष्वमध्येति। मनसि व्यभिचारवारणायैवकारः। त्वक्संनिकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीत्यपि बोध्यं। अं
गसंगसलिलं स्वेदः। आकरे प्रशस्तपादभाष्यादौ प्राणत्वैक इति। कथं तर्हि अपानादिव्यवहार इत्यत आह। स्था
नभेदादिति। हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः इति स्थानभे
दादित्यर्थः। क्रियाभेदाच्चेति। मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राणः। मलादीनामधोनयनादपानः। आ
हारपाकार्थं वह्नेः समुन्नयनात् समानः। ऊर्ध्वं नयनादुदानः। नाडीमुखेषु वितननाद्व्यान इति। क्रियाभेदाच्चेति।
पंचसंज्ञां लभते। न तु संज्ञाभेदेन संज्ञिभेद इत्यर्थः॥ ॥ इति वायुग्रंथः॥ ॥ आकाशेति। कालत्वं दिक्त्वं जा

मुक्ता॰ श तकारणत्वं बोध्यं। मुक्तावल्यां तत्रेति। तत्र काले। जगतामाश्रय इतीति। कालः सर्वेषामितिप्रतीत्या सर्वाधिकरण काश
१८ त्वेन कालसिद्धिरिति भावः। नन्वेतादृशप्रतीतिर्दिग्विषयिण्येवास्तु। अतिरिक्तकालकल्पने गौरवादतोनेकव
लंमनया प्रतीत्या कालः साध्यते। परंतु प्रमाणांतरेण सिद्धे काले प्रकृतप्रतीतिबलात्सर्वाधारत्वं कल्प्यते इत्याहुः
इदानीमित्यादिना सूर्यस्पंदादिकमिति। इदानींतदानीमितिप्रतीतिर्महाकालं विषयीकरोतीति न च वाच्यं। तथा सति
सति इदानीं घटो न तदानीमिति प्रत्ययानुपपत्तिः। न च तत्क्रियाविशिष्टो महाकाल एव इदानीमित्यादिप्रत्ययविषयः
तथा चेदानीं घटो न तदानीमित्यस्य एतत्क्रियाविशिष्टस्य काल इत्यर्थ इति वाच्यं। तथा सति तत्तत्कालविशिष्टमहा
कालापेक्षया लाघवेन तत्तत्क्रियाया एव तादृशप्रतीतिविषयत्वस्यौचित्यादिति। इतीयमनंतरे। स्वाश्रयपतन
संयोगिसंयोग एव संबंधो वाच्यः स्तत्र विशेषः। न च आकाश एव संबंधघटक आस्तामिति वाच्यं। आकाश
स्यासन्ना। विनिगमनाविरहेणातिरिक्तकालस्यैव तथात्वात्। इत्थं चेति। अतिरिक्तकालसिद्धौ च सर्वैः
सम्यगिति। कालः सर्वेषामिति प्रतीतिरतिरिक्तकालविषयत्वस्यौचित्यादिति भावः। परत्वापरत्वबु १८

छे स
द्धेरिति। ज्येष्ठपरत्वप्रत्ययः। कनिष्ठापरत्वप्रत्ययः सच परत्वापरत्वगुणविशेषाधीनः परत्वापरत्वे समवायिकारणके भावकार्य
त्वात्। असमवायिकारणं तयोः कालपिंडसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धि
रिति भावः। परत्वापरत्वयोरित्यस्य वक्तुमुचितत्वेपि तद्बुद्धिपर्यंतानुधावनं कालिकपरत्वापरत्वयोः प्रमाणं दर्श
यितुं। न च पिंडगतरूपादेरेव परत्वापरत्वासमवायिकारणत्वमस्त्विति वाच्यं। कालिकपरत्वापरत्वयोर्वायावप्युत्पादेन व्य
भिचारात्। अत एव पृथिवीपिंडसंयोगस्यैन तत्र कारणत्वं। पृथिव्यसंयुक्तपदार्थेषु तादृशपरत्वापरत्वयोरुत्पादेन व्य
भिचारात्। ननु तथाप्याकाशादिगात्मभिः पिंडसंयोगस्य तथात्वं स्यात्। किं कालकल्पनयेत्यत आह। लाघवादिति
आकाशादिभ्यो पिंडसंयोगस्य तथात्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहादात्मनस्तोऽनंतत्वान्न तथा
त्वं किंतु लाघवादतिरिक्तः काल एव तथात्वेन कल्प्यत इति भावः। यदि काल एक एव तदा क्षणलवकाष्ठादिना ननु
नाव्यवहारस्तत्र न स्यात्। न चैकस्मिन्नेव घटे घटः कलशः कुंभ इति व्यवहारवदत्रापि क्षणादिनानाव्यवहारबा
धकाभावादिति वाच्यं। एकस्मिन्विरुद्धनानाव्यवहारायोगात्। न हि घटत्वकलशत्वादिकं मिथो विरुद्धं क्षणत्वदि
नत्वादिकं तु विरुद्धमेव न हि दिनं क्षण इति प्रतीतिरस्तीति शंकते। नन्वेकस्येति। समयभेदः। समयभेदव्यवहारः।

 विभिन्नव्यवहारविषयमितियावत्। एकस्मिन्नन्निरुद्धनानाव्यवहारविषयत्वाभावादितिभावः। उपाधिभेदादिति। तथाचैक

२० स्यैवकालस्य किंचिद्धर्मविशिष्टस्यक्षणत्वं किंचिद्धर्मविशिष्टस्यदिनत्वं। नतुकालस्येतिभावः। इदमुपलक्षणं। तादृशोपा

धीनामेवक्षणत्वादिव्यवहारविषयत्वं। नतुमहाकालस्यापिद्रव्यं। स्वजन्येति। स्वंक्रिया। घटगतैकक्रियानाशोत्तरोत्पन्न

तद्भूतक्रियांतरजन्यविभागप्रागभावविशिष्टस्यप्रथमकर्मणः क्षणद्वयस्थायिनः क्षणत्वापत्तिरितिस्वजन्येति। नन्वे

वंप्रथमक्षणे क्षणव्यवहारोपपादनेपिद्वितीयक्षणेकथंतदुपपादनं तत्रक्रियाजन्यविभागोत्पत्त्याविभागप्रागभावाभा

वात्। नचद्वितीयक्षणोत्पन्नस्यक्रियांतरस्यैवनिरुक्तविशिष्टस्यैवतत्रक्षणत्वमितिवाच्यं। प्रतिक्षणंक्रियोत्पत्तौमानाभा

वादतस्तत्रापिक्षणव्यवहारोपपादकमुपाधिमाह। पूर्वसंयोगस्येति। स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वज

न्यविभागइत्यर्थः। तेनस्वजन्यस्यविभागस्यचकिंचिद्विशिष्टस्यद्वित्रिक्षणवृत्तित्वेपियत्किंचिद्विभागस्यस्वजन्यवि

भागनाश्यपूर्वसंयोगविशिष्टस्यतथात्वेपिनक्षतिः। तृतीयक्षणेतदुपपादकमुपाधिमाह। पूर्वसंयोगनाशावच्छिन्न २०

उत्तरसंयोगप्रागभावोवेति। स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभावेत्यर्थान्ना

पिमृदंगत्वादिनानिमित्तकारणतायाः स्वीकारात्। मृदंगेशब्दइतिप्रतीतेश्च। नचात्रावच्छेदकत्वं विषयोमानाभावात्। अन्य

थावच्छेदकतासंबंधस्वरूपसंबंधस्यान्यत्रसमवायस्यविषयताकल्पनेगौरवादिति। वदंति। इत्याकारात्ग्रंथः।। ।।मूले

न जन्यानांजनकेति। कार्यत्वावच्छिन्नप्रतिनिमित्तकारणमित्यर्थः। अत्रचकालिकावच्छिन्नकार्यतानिरूपिताधिक

रणतयानिमित्तत्वंकालत्वलक्षणं। कालिकसंबंधावच्छिन्नप्रतिकरणादिष्वधिकरणेतिकरणाददृष्टेश्वरयोर्नातिव्याप्ति न्या

रितिध्येयं। ननुकार्यमात्रंप्रतिकालस्यनिमित्तकारणत्वेकिंमानंमितिचेत् अद्यघटोभविष्यतिइत्यादिप्रत्ययस्तत्का

तदुत्प योत्पत्त्यधिकरणत्वेनकालोविषयीक्रियतेतस्याधिकरणत्वेनव्यवहारविषयस्यतदुत्पत्तिहेतुत्वनियमात्। तदुत्पत्तिं मत्वस्य

हेतुत्वसमतघेतुत्वव्याप्यत्वनियमात्। एवंचतत्तत्कार्यंप्रतितत्तत्कालविशेषस्यहेतुत्वेसिद्धेयद्विशेषयोरिति विज्ञानं

व्याप्त्याकार्यमात्रस्यहेतुतासिद्धिरितिसाचहेतुतानिमित्तकारणतैव। नचकालस्यकार्यमात्रेनिमित्तहेतु

त्वंनसंभवति। स्वसमवेतद्वित्वपृथक्त्वसंयोगविभागपरत्वापरत्वप्रतिकालस्यसमवायिकारणत्वेनतद्भिन्नत्वघ

टितस्यनिमित्तकारणत्वस्याभावान्नदिचार्यमुक्तं शक्यं। समवायसंबंधेनद्वित्वादिकंप्रतितस्यसमवायिका

रणत्वेपिकालिकसंबंधेनद्वित्वादिकंप्रतिनिमित्तकारणत्वस्यानपायात्। एवमेवकार्यमात्रेदिशोपिनिमि

तप्रतियोगिप्रतियोगिकप्रागभावध्वंसविशिष्टसमयस्यैव तत्र क्षणव्यवहारविषयत्वादिति भावः। इति कालग्रंथः॥
बीजं प्रयोजकं। कथं दिशस्तत्र प्रयोजकत्वं तद्दर्शयति। दैशिकपरत्वापरत्वयोरिति। तथा च परत्वापरत्वयोर्बुद्धिं प्रति
परत्वापरत्वेनैमित्तं। तत्र दिक्पिंडसंयोगस्तत्र दिगितिक्रमेण परंपरया दिशः स्वबुद्धेर्निमित्तत्वं बोध्यं। अत्रापि बुद्धि
पर्यंतानुधावने दैशिकपरत्वापरत्वयोः प्रमाणं दर्शयितुं। तादृशपरत्वापरत्वाभ्यामेव तदनुमितिः संभवादिति। प्राच्यादीत्यादिना
उदीच्यादिसंग्रहः। उपाधीति। वस्तुतो दिश एकत्वं। तत्तदुपाधिभेदेन प्राच्यादिभेद इत्यर्थः। प्राच्यादिसंज्ञासु निमित्तभूता
नुपाधीनाह। यस्तु कश्यस्येति। यस्तु वस्यतीति पदार्थमात्रलक्षणं। पंचम्यर्थे षष्ठी। दिङ्मूर्तं च। एवमग्रेपि। तथा च यदपेक्षयोद
यगिरिसन्निहितं यन्मूर्तं ततः सा प्राचीत्यर्थः। तदपेक्षयोदयसंनिहितं च तन्निष्ठोदयगिरिसंयुक्तसंपेक्षया योग
प्ततयोदयगिरिसंयुक्तसंयोगवत्वं। इत्थं च मथुरातः प्राच्यां प्रयाग इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्तसंयोगपर्या
प्तसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्तवृत्तिः प्रयाग इत्यन्वयबोधः। एवं काशीतः प्रयाग इत्यत्र का
शीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्यापक संख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्तवृत्तिः प्र

व्याप्य संख्या

याग इत्यन्वयबोधः। एवमन्यत्रापि बोधा ऊहनीयाः। तन्निष्ठोदयाचलसंयुक्तसंयोगपरंपराघटकमूर्त्तत्वं प्राचीत्यपि वदंति। दी
धितिकृतस्तु। दिक्कालौ नेश्वरादतिरिच्येते। मानाभावात्। तत्तत्कालोपाधिदिगुपाधिविशिष्टादीश्वरादेव क्षणदिनप्राची
प्रतीच्यादिव्यवहारोपपत्तेरित्याहुः। अत्र नव्याः। ईश्वरस्य दिक्कालत्वे जीवस्यैवेति विनिगमनाविरहेणातिरिक्तयोर्दिक्का
लयोर्जगज्जनकत्वाकल्पनादिकालोपाधीनामेव जगज्जनकत्वकल्पनात्। न च तत्तज्जीवस्य जगज्जनकत्वपरापर
त्वकल्पनं च कल्प्यमीश्वरस्य तु क्लृप्तमिति लाघवमिति वाच्यं। संबंधघटकयोस्तयोः स्वीकारः। परत्वापरत्वयोस्तयोस्तु
गुणत्व एव मानाभावः। सन्निकृष्टविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेरिति वदंति॥ इति दिग्निरूपणं॥॥ सुखदुःख
ना दीति। ज्ञादिं ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः। यद्यप्यात्मत्वस्य अन्यात्मन्यप्रत्यक्षत्वेपि स्वात्मनि स्वरूपतो मानसप्र
त्यक्षविषयत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपत्वसिध्यतीति। अनेकस तज्ञ
मवेतत्वघटितजातित्वग्रहेऽनेकव्यक्तित्वग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखा
दिकारणतावच्छेदकतयात्मत्वसिद्धिः प्रदर्शिता। अथ सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन कारणत्वे मानाभावः। सु
खदुःखेच्छाद्वेषभावनाधर्माधर्मं प्रति यथाक्रमं धर्माधर्मेष्टानिष्टसाधनत्वादिज्ञानानुभवविहितनिषिद्धकर्मणां समवा

द्रव्यत्वेन

मुक्ता० यसंबंधेननिमित्तकारणत्वावश्यकतयातिप्रसंगाभावात्। भाककार्याणां समवायिकारणकत्वनियमस्यतैत्तच्छक्तिके / शक
२२ समवेतंप्रतिलत्तच्छक्तित्वेनवासमवायिकारणत्वेमादृयैवोपपन्नत्वादितिचेदत्रप्रात्रचः। कार्यमात्रवृत्तिजातेः सम
वायिकारणकार्यतावच्छेदकत्वनियमेनतादृशकार्यकारणभावस्यावश्यकत्वात्। नचतावतासुखत्वाद्यवच्छिन्नं
प्रतिसत्वेनद्रव्यत्वेनकारणत्वमस्तु। अदृष्टादेर्निमित्तकारणत्वादेवातिप्रसंगविरहादितिवाच्यं। व्याप्यत्वलघुभू
तधर्मकारणतावच्छेदकेसंभवति व्यापकधर्मेणकारणत्वकल्पनायाः अन्याय्यत्वादित्याहुः [illegible]। वस्तुतस्तु
मनसिज्ञानोत्पत्तिवारणायज्ञानत्वाद्यवच्छिन्नंप्रत्यात्मत्वेनहेतुत्वमावश्यकमिति। ननुतथापि आत्मत्वजातेर्भग
वदात्मसाधारण्यमानाभावइत्यत आह। ईश्वरइति। आत्मावारेद्रष्टव्यः श्रोतव्या इति श्रुतावात्मपदव्यवहारादि
तिभावः। ननुतर्हि ईश्वरेसुखाद्युत्पत्तिकुतोनभवतीत्यत आह। अदृष्टादीति। आदिनाशरीरादिपरिग्रहः
ननुनियस्यस्वरूपयोग्यत्वफलावश्यंभावइतिनियमेनेश्वरस्यस्वरूपयोग्यत्वेफलापधानापत्तिरित्यत
आह। नित्यस्येति। अप्रयोजकत्वादिति। जलपरमाणोस्नेहानुत्पत्त्यातादृशनियमेमानाभावादितिभावः। २२

तिप्रसंगः। कश्चित्तुत्तरे पूर्वसंयोगनाशावच्छिन्नविभागोवेतिपाठः। सचग्रामादिकः प्रथमद्वितीयक्षणेषुएकैकोपा
धेराभिहिततयात्तृतीयक्षणउपाधिद्वयाभिधानेतसंदर्भविरोधापत्तेः। उत्तरसंयोगस्यैवविभागनाशकतायाः
सिद्धांतसिद्धतयानिरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च। यद्यपितत्साम्प्रामाण्यग्रहस्तदापूर्व
संयोगनाशस्यैवविभागनाशकत्वाभिप्रायेणयोजनीयः। चतुर्थक्षणेतमाह। उत्तरसंयोगेति। स्वनाशोत्तरसं
योगइत्यर्थः। तेनसर्वस्यैवसंयोगस्योत्तरसंयोगतयातद्विशिष्टकर्मणः क्षणचतुष्टस्थायिनः क्षणत्वापत्तिःपरास्ता।
नन्वेतादृशत्वक्षणत्वलक्षणंमहाप्रलयात्मकक्षणेव्याप्तं। तत्रतादृशकर्मणोभावात्। नचमहाप्रलयस्यक्षण व
त्वाभावइष्टइतिवाच्यं। तथापिक्षणव्यवहारस्यसत्वादन्यथामहाप्रलयोत्पत्तौतु प्रवृत्तिलक्षणस्यतदुर्धिक्षणा करण
वृत्तित्वव्याप्यस्वरत्तिध्वंसप्रतियोगिताकसमयवृत्तिचरूपस्यात्व्याप्त्यापत्तेः। तत्रमहाप्रलयाधिकरणक्ष
णात्मसिद्धेरत आह। महाप्रलयेति। महाप्रलयक्षणव्यवहारोनास्त्येव। उत्पत्तिलक्षणस्यक्षणाघटितस्यैवस्ववृत्तिध्वंस
प्रतियोगिकालावृत्तित्वविशिष्टस्ववृत्तित्वरूपस्यतदुत्पत्तौसंभवादित्यपि [illegible]। यदिति। ध्वंसेनेवेति। स्ववृत्तिध्वं

प्रायण

मुक्तां०टी कइतिभावः॥ चार्वाकमतं परिहरति॥ नेति॥ स्मरणानुपपत्तेरिति॥ अनुभवाश्रयस्य बाल्यशरीरस्य तदानीमभावादिति भावः॥ दिनकरी
ननु बाल्यशरीरं तदा अस्त्येवेत्यत आह। शरीराणामिति। संस्कारादुत्पद्यत इति। तथाच स्वप्रयोज्यसंस्कारसंबं
२२ धेन बाल्यशरीरस्य समवेतानुभवस्य स्थविरशरीरे सत्त्वान्न स्मरणानुपपत्तिरिति भावः। गौरस्य फलमुखत्वाद्दूषणां
तरमाह। एवमिति। नस्यादित्यत्र हेतुमाह। इष्टेति। तत्त्वेतुत्वात्। तदानींस्तनपानप्रवृत्त्यव्यवहितपूर्वकाले। ननु प्र
वृत्त्यनुपपत्तिस्तव मतेपि समानेत्याशंक्य स्वमते प्रवृत्त्यनुपपत्तिं परिहरति। मन्मतेत्विति। अन्यदपीति। इष्ट
साधनत्वादन्यदपीत्यर्थः। अत्र तु स्तनपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरणेति। आत्मनो नित्यत्वं साधयति।
इत्थं चेति। प्रागभावस्य नाशासंभवादाह। भावेति। नाशासंभवादिति। नाशं प्रतिजन्यभावत्वेन हेतुत्वादात्मनो २२
अनादित्वेन जन्यभावस्वरूपहेत्वभावेन नाशासंभवादित्यर्थः। ननु चक्षुरादीनामेव ज्ञानादिकं प्रतिकारण
त्वं कर्तृत्वं चास्त्विति। करणत्वं हि व्यापारवत्त्वे सति कारणत्वं। भवति हि चक्षुरादेश्चक्षुःसंयोगादिरूपव्यापारवत्ति

चाक्षुषज्ञानाव्यवहितपूर्वकाले कचित्त्वं। न तु फलोपहितत्वं। राजसूयेन स्वाराज्यकामो यजेतेत्यादौ यागादिनिष्ठकार
णत्वादावप्रसंगात्। करणत्वकारणत्वयोर्विशेषप्रसंगाच्च। कर्तृत्वं च यद्यपि क्रियानुकूलकृतिमत्त्वं न संभ
वति। अचेतनेन चक्षुरादौ तथापि पूर्वपक्षिणातिरिक्तस्य मनः कृत्यादीनामात्मसमवेतत्वस्य चानंगीकरणात्
स्ति कृत्याश्रयत्वमपि चक्षुरादीनामित्यर्थः। नन्वेकस्यैव कर्तृत्वे करणत्वे कर्तृकरणयोर्भेदानुपपत्तिरित्यतो वि अवहार
ष्टति रोध इति। विरोधो विभिन्नाधिकरणत्वं। तथाच कर्तृत्वादिकरणत्वादिलक्षणोपाधिभेदात्कर्तृकरणादिव्य
वहारोपपत्तिरित्याशयः। नचैतन्यमित्यत्र विशेष्यतयोपस्थितस्याभावस्य तच्छब्देन परामर्शसंभवाद्याचष्टे
तथाचैतन्यमिति। उपघातपदस्य लोके नयनाशे एव प्रयोगादाह। नाश इति। मूले उपघाते कथं स्मृतिरि सु
त्युक्तं। तत्रोपघातः केषामित्याकांक्षायां सत्वादाह। अर्थादिति। तथाचैकमेवेन्द्रियाणामिति पदमाकांक्षा
वशादुभयत्र संबध्यत इत्याशयः। कथं स्मृतिरिति मूले नेन्द्रियाणां चैतन्यपक्षे स्मृत्यभाव आपादितः। तत्र
हेत्वनुक्तेः स्वयं हेतुपूरणपूर्वकमर्थमाह। पूर्वं चक्षुषेति। ननु इन्द्रियांतरेणैव स्मृतिर्भविष्यतीत्यत आह। अन्ये

मुक्ताम नन्वनुभूतस्येति। तत्र हेतुमाह। अनुभवेति। यद्यप्यव्यधिकरणयोः कार्यकारण[भाव]विरहात् सामानाधिकरण्येनैतु कारा
२४ कैविफला तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासंबंधेनानुभव इति इदृशविषयत्वघटित। ज्ञानसामा
नाधिकरण्यप्रयासस्य कार्यकारणभाव आवश्यकः। आत्मनिष्ठसामानाधिकरण्यघटितकार्यकारणानुभा
वेन घटानुभवानंतरं पटादेर्विषयतासंबंधेन स्मृत्यापत्तेर्वारणात्। चक्षुःकर्तृकानुभवस्य घटे सत्वादिंद्रियांतरकर्तृ
कस्मरणं तत्र नानुपपन्नमित्याशंकानिराकरणाय तथोक्तिः। समवायघटितसामानाधिकरण्यप्रयासस्येति तद
र्थः। चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्पुरुषीयत्वनिवेशे पुरुषभेदेनानंतकार्यकारणभा
वकल्पनेन गौरवात् समवायघटितसामानाधिकरण्यप्रयासस्यात्तयोर्हेतुहेतुमद्भावस्वीकारादिति भावः इत्यध्ये
यं। इंद्रियाणां चैतन्यपक्षे योदोषः सोत्र कल्पनालीति सूचयितुं नियतस्येति। ननु तथेत्यत्र मूलतच्छब्देन पूर्वोप २४
स्थितचैतन्यस्यैव परामर्शो मत्स्वीसैत्तथात्वासंगतिरत आह। न तथानवेतनमिति। अनध्यक्षतदाभवे

ननु ईश्वरे दृष्टं कुतो नोत्पद्यत इति चेन्न। मिथ्याज्ञानरूपकारणाभावात्। मिथ्याज्ञानस्य हेतुत्वे च मुक्तात्मन्यपि अदृष्टो
त्पत्तिप्रसंगः। वेदस्थानपदादेर्नित्यज्ञानादिति लक्षणापत्तिरित्यस्वरसः आहुरित्यनेन सूचितः। इंद्रियाद्यधिष्ठातेति मूलं
आत्मनि प्रमाणपरतया व्याचष्टे। इंद्रियाणामिति। आदिपदसंग्राह्यमाह। शरीरस्येति। परंपरयाजनकतासंबंधेन चैत
न्यं। ज्ञानवत्वं। एतेनात्मनि प्रमाणमुपदर्शितं। अचेतनं चेतनाधिष्ठितं तथा करोतीति व्याप्तेः अहं सुखी सादिना अहंज्ञा त्व
नाभिकरोभीत्यादिपरिग्रहः। न च आत्मा तावत्प्रत्यक्षेतित्तत्रभाष्यविरोध इति वाच्यं। आत्मन च विवेके परमीमा
भिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात्। विप्रतिपन्नं प्रतीतिरिति। अहमितिप्रतीतेः शरीराद्यतिरिक्तविष
यत्वे विप्रतिपन्नं प्रतीत्यर्थः। नव्यायकमते यथा मुक्तात्मनां ज्ञानाभावेन ज्ञानाधिकरणत्वरूपचैतन्यं। तथास्माभिमते
मृतशरीरस्य च न चैतन्यमिति। शरीरमेवात्मेति चार्वाकः शंकते। चैतन्यमिति। ज्ञानादिकं प्र ज्ञानाद्यधिकरण
चैतन्या त्वं। तदभावज्ञानाभावः। ननु च न मते मृतशरीरे ज्ञानाभावः किंनिबंधनः। मन्मते तु प्राणविशिष्टस्यात्मनोवि
रह एव तत्र ~~[illegible]~~ तत्र हेतुरित्यत आह। प्राणाभावेनेति। तथा च लाघवात् प्राणाभाव एव चैतन्यविरहप्रयोज

मु.का.टी द इत्यादिनेति। विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं वाभिमतं विकल्प्याद्ये दूषणमाह। तस्येति। द्वितीये सा दिनक
ह। यत्किंचिदिति। आत्मस्वरूपविज्ञानस्य सविषयकत्वे दूषणमाह। सुषुप्ताविति। शंकते। तदानीमिति। नि
२५ राकारा निर्विषयिणी। चित्संततिः विज्ञानसंततिः। प्रकाशत्वे ज्ञानेच ज्ञानत्वस्य विषयिता व्याप्यत्वादि
तिभावः। अन्यथाप्रमाणाभावेपि तत्र ज्ञानत्वस्वीकारे। ~~आकारस्य विज्ञानत्वस्वीकारे~~। आकारस्याव
ज्ञानातिरिक्तत्वं अनतिरिक्तत्वं वेति विकल्प्याद्ये दूषणमाह। तर्हि समेति। द्वितीये त्वाह। समूहालंबन
इति। नीलपीतइति समूहालंबनइत्यर्थः। स्यादिति। तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भा
वः। एतदेवोपपादयति। स्वरूपतो विज्ञानस्येति। विज्ञानस्वरूपस्येत्यर्थः। अविशेषादेकत्वात्। ननु नी २५
लाकारः पीताकारश्चाभिन्न एव। भेदप्रतीतिस्तु विरुद्धधर्मयोर्नीलत्वपीतत्वयोर्भेदात्। नचतयोरपि विज्ञानस्वरूपत्वे श्री
भेदः। नीलत्वादेरपारमार्थिकस्य पारमार्थिकविज्ञानेनाभेदासंभवादित्यभिप्रायवान् शंकते। अथाह रूपइति।

था
अनीलव्यावृत्तिरूपइत्यर्थः। इतरेति विरुद्धनीलत्वादीनामेकत्रसमावेशा। ननु समूहालंबनेनैव नीलाकारोनवापीताका
रोप्युपेयते परंतु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तवासनासंक्रममुख्यतया दूषयति।। नचेति।। मातृपुत्रयोरि
मा ति।। मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगादिति भावः॥ उपादानेनानुभूतं उपादेयेन स्मर्यत इत्यपि नि ६
रस्यति। नचेति।। शंकते। उत्तरस्मिन्निति। तदुत्पादकेति।। वासनोत्पादकेत्यर्थः।। चित्तामेवेति। ज्ञानानामेव सं
स्कारोत्पादकत्वे तेषामानंत्यात्संस्कारानंत्यापत्तिरित्यर्थः।। शंकते केचिदिति।। अतिशयविशेषः।। उत्तरोत्तर
ज्ञानानुकूलतयेति शेषः।। गौरवादिति।। सर्वथाप्युपपत्त्या पामरप्रत्यभिज्ञानात्क्षणिकानंतशक्तितत्प्रागभावतद्ध्वं
सकल्पने गौरवादित्यर्थः।। ननु क्षेत्रस्थबीजादंकुरोत्पत्तिर्न कुसूलस्थबीजादंकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वे
न हेतुत्वमंगीक्रियते।। कुर्वद्रूपत्वं चांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः।। सच फलोपधायक क्षणि
कसमर्थबीजमात्रवृत्ति बीजत्वव्याप्यः कल्प्यते।। एवमत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरवृत्तेरोत्तरशरीरनि

सुगतमकाष्ठवासनोत्पादकत्वं वाच्यमत आह। बीजादाविति। उपपत्तेः। कस्माच्चिद्बीजादेरंकुरोत्पत्तिः कस्माच्चिन्नेति नियमोपपत्तेरि २०
कुर्वद्रूपत्वादिति। कुसुमस्थबीजादिषु धरणिसंयोगरूपसहकार्यभावादेवांकुरानुत्पत्तेः कुर्वद्रूपत्वे तद्रूपेण जनक
२६ त्वं जनकत्वं स्यादित्प्रमाणाभावादिति भावः। अत्र वदन्ति। यत्सत्तत्क्षणिकमिति व्याप्त्या जगतः क्षणिकता तदनुरो
धेन च कुर्वद्रूपत्वं तद्रूपेण कार्यप्रतिहेतुत्वं चावश्यकं। न च तादृशव्याप्तौ प्रमाणाभावः। तादृशव्याप्त्यस्वीकारे कु
सुमस्थबीजादंकुरासत्त्वनिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौरवात्। तादृशव्या
प्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसुमस्थबीजे कुर्वद्रूपत्वाभावादेवांकुरानुत्पत्तेर्न सहका
रिताकारणान्तराणामिति लाघवात्। न च क्षणिकत्वमते बीजस्य धरणिसलिलसंयोगादौ कुर्वद्रूपत्वे
नहेतुत्वमित्यत्र विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यं। मन्मतेंकुरं प्रति बीजा २६
नां धरणिसलिलसंयोगादि सहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात्। कुर्वद्रूपत्वानंगीकारे बीजत्वधरणिसं

द्धिनिर्मूलेन। मनसश्चैतन्ये ज्ञानादेरप्रत्यक्षत्वमुक्तं। तत्र हेतुं प्रदर्शयन्नाह। मनस इति। तत्प्रत्यक्षेति। ज्ञानादिप्रत्य
क्षानुपपत्तेरित्यर्थः। ननु मनसोऽणुत्वमेवासिद्धमत आह। तथा चेति। अग्रे वक्ष्यत इति। अयोगपद्याज्ज्ञाना
नां तस्याणुत्वमिहोच्यते। इति ग्रन्थेन मनसोऽणुत्वं साधयिष्यत इत्यर्थः। विज्ञानवादी शंकते। नन्विति। विज्ञा
नमेवेति। आत्मनिरूपणस्य प्रस्तुतत्वादात्मेत्युक्तं। वस्तुमात्रस्य तन्मते विज्ञानरूपत्वादिति बोध्यं। अत्र ज्ञा
नत्वं प्रमेयत्वस्य सत्त्वस्य व्यापकत्वं न वेति विप्रतिपत्तिः। तत्र विधिकोटिर्योगाचारस्य। निषेधकोटिर्नैयाय
कस्येति ध्येयं। द्विविधं विज्ञानं प्रवृत्तिविज्ञानं आलयविज्ञानं चेति। अत्र घट इति प्रवृत्तिविज्ञानं। अहंज्ञानमि
त्यालयविज्ञानं। तदेवात्मा। तस्य विज्ञानस्य। ननु सुषुप्तावालयविज्ञानधारानसिद्धेस्तदानीं विज्ञान
स्य क्षणिकत्वेन नाशाद् ज्ञानान्तरस्य च तदानीमुत्पादकाभावात्। अत आह। पूर्वपूर्वेति। ननु विज्ञा
नक्षणिकत्वे तदाश्रितसंस्कारस्यापि क्षणिकत्वात् कालान्तरे स्मरणं न स्यादित्याशंकापरिहरति। तामन्तगम

स्वरूपत्वपक्ष इत्यर्थः। आत्ममात्रस्य नित्यविज्ञानविज्ञानरूपत्वमीश्वरस्येति विकल्प्य द्वितीयं दूषणमाह। तस्येत्यादिना
। दर्शितत्वादिति। तस्य जगद्विषयकत्वे त्वादिग्रन्थेन दर्शितत्वादित्यर्थः। तथाच जीवस्येतथात्वसंभवात् आत्ममा
त्रस्य नित्यज्ञानरूपत्वमिति भावः। ननु जीवस्य न जगद्विषयकत्वं। नवा नियतत्वं किं चिद्विषयकत्वं भ्रमः।
परंतु यद्विषयकत्वं यत्र जीवेनानुभवसिद्धं तत्र तद्विषयकत्वमित्यत आह। सविषयत्वस्येति। ननु सत्यं ज्ञा
नमनंतमिति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमाह। सत्यमिति। ननु जीवब्रह्मणोरैक्यान्निसविज्ञानरू
पं जीवस्य निराबाधमित्यतो जीवब्रह्मणोभेदं साधयति। ज्ञाना ज्ञानेति। सुखित्वादीत्यादिना दुःखित्वादि
परिग्रहः। सुतरामिति। जीवात्मनां नानात्वसिद्धावीश्वरस्यानेकजीवित्वासंभवादेकत्वानेकत्वावि
रोधादिति भावः। ईश्वरभेदः ईश्वरजीवात्मनोर्भेदः सिध्यतीति शेषः। अन्यथा ईश्वरस्य जीवात्मकत्वे
बंधमोक्षेति। कश्चित्संसारी बद्धः कश्चिन्मुक्त इति व्यवहारव्यवस्थानुपपन्ना स्यादित्यर्थः। चेत्रमैत्रा
त्मनोरीश्वरस्वरूपयोरैक्यापत्तिरिति भावः। ननु तर्हि तत्त्वमसीत्यादितत्पदब्रह्मप्रतिपाद्यब्रह्मणि युष्मद

त्प्रतिपाद्यजीवस्याभेदबोधको वेदः प्रमाणमित्यत आह। योपीति। तदानीं मोक्षकाले जीवात्मनो
ब्रह्मणा सह अभेदमुपपद्यत इति तिङ्गिर स्यति। मोक्षेति। भेदस्यानित्यत्वमभ्युपगम्यापि मोक्षकाले जीव
ब्रह्मणो भेदं व्यवस्थापयति। भेदनाशेपीति। भेदसत्वेव्यक्तिद्वयं निविवादमेवेत्यपिना सूचितं। तथैव दा
तिनः॥ निर्धर्मिकइति॥ दुर्देचसत्य लाभावेपीत्यत्रेरु तुतया॥ ननु निर्धर्मिकत्वस्य भिन्नजातिशून्यत्वे मिथ्यात्वाभाव
रूपसत्यत्वस्य ब्रह्मस्वरूपत्वादसावस्य बाधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेणाशंकते। मिथ्यात्वाभावेति। ननु क
थं मे कत्वाधिकरणे तदभावरूपं हि त्वमत आह॥ प्रत्येकमिति। केवलविदं ज्ञेनभवनीति श्रुतेर्मोक्षदशायामप्येरकस्य धर्मत्व
धर्मेकत्वाधिकरणे तदभावरूपं हि त्वमत आह॥ प्रत्येकमिति। केवलविद्वान्ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेवेति
त्यर्थिकायाः कामतिरत आह। योपि तदानीमिति॥ अत एव ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेव नि
त्यर्थिकायाः कामतिरत आह। योपितदानीमिति॥ अत एव ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेव नि
त्यर्थिकायाः कामतिरत आह। योपितदानीमिति॥ विज्ञानपदेन नित्यमित्यादिश्रुत्यंतर्गतविज्ञानपदेन। धिकरणं
रंजनः निर्दुःखः द्वितीये दोषमाह॥ ईश्वरेपीति॥ विज्ञानपदेन नित्यमित्यादिश्रुत्यंतर्गतविज्ञानपदेन। धिकरणं
॥विज्ञान॥ रंजनः निर्दुःखः द्वितीये दोषमाह॥ ईश्वरेपीति॥ आनंदवदित्यर्थइति॥ अस्य धर्मप्रत्ययवता जात्येनानंदशब्देना
ज्ञानस्य तु पदेन विज्ञानाश्रयबोधनादिति भावः॥ नन्वानंदवदित्यर्थो न संगच्छते। न च मतेर्द्वैस्व
ज्ञानस्य तु पदेन विज्ञानाश्रयबोधनादिति भावः॥ नन्वानंदवदित्यर्थो न संगच्छते। नबमतेर्द्वैस्व
मंदवतोबोधनादन्यथानंदमिति नपुंसकत्वानुपपत्तेरिति भावः॥ नन्वानंदवदित्यर्थो न संगच्छते। न ब मतेर्द्वैस्व
मंदवतोबोधनादन्यथा नंदमिति नपुंसकत्वानुपपत्तेरिति भावः॥ लक्षणाकल्पनमेव नवदोष इत्यत आह॥ अस्त्वेवेति। अस्करवमि ति।
रैआनंदभावादित्यत आह। आनंदेपीति। लक्षणाकल्पनमेवनवदोषइत्यत आह॥

लाभार्थं

॥दिन॰॥ अस्रुखमित्यत्र नयायस्त्रणिस्रुखभेदबोधनादिति भावः॥ क्लिष्टकल्पनापत्तेरिति। बहुव्रीहावन्यपदार्थे नञस्तत्र लक्ष ॥प्रत्य॰॥
णापत्तेरित्यर्थः॥ न च नञ्‌तत्पुरुषेपि नञो लक्षणावश्यकी। अन्यथा नञर्थस्य नामार्थेन तया भेदेनान्वयासंभवादिति वा
॥२६॥ च्यं। तस्य नामत्वेपि निपातत्वादिति। ननु तत्र नञ्‌ नस्रुखेपि तत्रासुखपदस्य पदयोरेकधर्मिबोधकत्वलक्षणस
मानाधिकरण्यमनुपपन्नमन्यथा नयोः समानवचनत्वानुपपत्तेरनस्तु निर्विकारार्थे नञ आभाववृत्तौ लक्षणानन
वाप्यवाश्यकी अत आह। प्रकरणेति। प्रत्ययविरोधादिति॥ आनंदशब्दस्य पुल्लिंगत्वनियमेनानंदमिति रूपस्यमव
र्थे यत्प्रत्ययं विनानुपपत्तेरिति भावः॥ सांख्यमते दूषयतनुपपन्यस्येति॥ एतेनेति। पूर्वोक्तयुक्त्यामनोज्ञानेव त्वसा
धनेन वक्ष्यमाणयुक्त्या चेत्यर्थः॥ प्रसृतिरिति। मूलप्रसृतिरित्यर्थः। कर्तृत्वेति। कर्तृत्वं चात्र कर्तृभूतानःकरणप्रकृ
तित्वमनुकूलकृतिमत्वलक्षणकर्तृत्वस्य तन्मते अंतःकरणधर्मत्वादिति ध्येयं। पुष्करपलाशवदिति। पअप
त्रवदित्यर्थः॥ यथा च यथापि पत्रे जलसंलिप्तं न भवति। तथा पुरुषः कर्तृत्वाद्याश्रयो न भवतीति भावः॥
तथा च पुरुषः कर्तृत्वाभाववान्‌ कार्यत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यं॥ ननु तत्र कारणसत्त्वाश्रयत्वप्रसि
द्धिरत आह। कार्यकारणयोरिति। नस्यादिति। न भवेदित्यर्थः॥ तस्य पुरुषस्य। नन्वेतादृशपुरुषसत्त्वे किं
मानमत आह। बुद्धिगतेति। क्वचित्प्रसिद्धस्य वचनान्यस्य बुद्ध्यावारोपसंभवादिति भावः॥ प्रसूतेरिति। मू
लप्रसूतेरित्यर्थः॥ ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्यभावात्‌ तयोर्नस्रुखदुःखयोरस्तत्रानुपपत्तिः

॥२६॥

योग। आदिना नाहेतुत्वकल्पने गौरवादिति। तदसत्‌। ईदृशगौरवापेक्षया क्षणिकानंतपदार्थकल्पने अतिगौरवा
त्‌। न च कर्तृत्वत्वेन तेषामेकहेतुतास्ति यो ईदृशाकल्पनं न दोषायफलमुखत्वादिति वाच्यं। फलमुखगौरव
स्यापि दोषत्वात्‌। किंच जगतः क्षणिकत्वे स एवायं घट इति प्रत्यभिज्ञानुपपत्तिः। पूर्वकालीनघटाभेदस्य
तत्कालीनघटेभावात्‌। न च तत्र जातीयाभेद एव तादृशप्रतीतिविषयः तन्मते जातेरपि क्षणिकत्वेन पूर्वका
लीनघटवृत्तिघटत्वस्यैतत्कालीनघटेभावात्‌। एतेन जगतः क्षणिकत्वे नाशावधिं प्रति सत्त्वेनैकमे
व हेतुत्वमिति। लाघवमप्यपास्तं। यदपि स्थिरपदार्थांगीकारे एकस्मिन्पदार्थे सामर्थ्यमसामर्थ्यं च विरु
धर्मतस्तद्भेद इति तदपि न। एकस्मिन्नेककालावच्छेदेन सामर्थ्यतदभावयोर्विरुद्धतया कालभेदेन त
स्वीकारासंभवबाधकाभावात्‌। यत्तु पूर्वापरकालीनधर्मिणोर्भेदेन धर्माधर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोनुपपन्न
स्तन्मते धर्मधर्मिणोरभेदादादिति। तन्न। घटत्वं न घट इत्यादिप्रतीतीनां प्रामाण्यापत्त्या धर्मिधर्मिणोर्भेदस्य
वन्धुमराकयत्वादिति दिक्‌। वेदांती शंकते। अस्तु तर्हीति। क्षणिकविज्ञानेति। आत्मनः क्षणिकविज्ञान

मुक्ता० टी दिति। बुद्धिपुरुषयोर्भेदाग्रहादित्यर्थः। इदानीं बुद्धितदुपलब्ध्योर्भेदप्रदर्शनाय बुद्धेरंशत्रयं प्रदर्शयन्ति। ममेदमित्यादिना दिनकरी
। पुरुषोपरागः पुरुषसंबंधः। प्रतिबिंबमात्रं। दर्पणस्य यथा मुखसंबंधः। ननु तात्विकस्तथा बुद्धिपुरुषयोर्भेदाग्रहा
देकत्वाभिमानः पुरुषोपराग इत्यर्थः। इंद्रियप्रणालिकया। इंद्रियद्वारा परिणतिर्भेदः। अयं घट इत्यादि ज्ञानरूपः
परिणाम एव विषयेण घटादिना बुद्धेः संबंध इत्यर्थः। तस्य पारमार्थिकत्वे निश्वासाभिहतदर्पणस्य मलिनिमादि
पुरुषोप वतः। कर्त्तव्यमितीति। पूर्वोक्तरागविषयोपरागाभ्यां कर्त्तव्यस्य घटादेरवभासः तेन कर्त्तव्यमित्यवसायो व्यापा
रांश इत्यर्थः। ज्ञानपुरुषस्य तात्विकः संबंध इति। अत्र ज्ञानेन पुरुषस्य यो तात्विकः संबंधः स उपलब्धिरित्यत्र
न्वयः। अतात्विके दृष्टांतो दर्पणमालिन्मेनेव मुखसंबंध इति। तथाच ज्ञानेन सह चेतनोहमिदं जानामीत्याकारः
बुध्यारोपितस्य यः संबंधो तात्विकः सा उपलब्धिर्न तु बुद्धेरेवोपलब्धिरिति भावः। इति सामानाधिकरण्येने
ति। अदृष्टस्यातींद्रियत्वे धार्मिकोहं करोमीत्यत्र दृष्टोपनीतभानरूपं तत्प्रत्यक्षत्वं बोध्यं। परिणामित्वादिति।
अनित्यधर्माश्रयादित्यर्थः। इत्यदृष्टभोगानामिति। इति: स्वसमानाधिकरणमेवादृष्टं जनयति। तच्चादृष्टं स्वस

मानाधिकरणमेव भोगं जनयतीति। इत्यदृष्टभोगानां परस्परसामानाधिकरण्यप्रमितिवच्चेतनोहं करोमीति सामानाधि
करण्यप्रमितेरित्यर्थः। तद्भिन्नेति। कर्त्तृभिन्ने। मानाभाव इत्यस्य चेतन इत्यादिः। चः पूर्वोक्तदूषणसमुच्चायकः।
कर्त्तृत्वाश्रयो न चेतनो जन्यधर्माश्रयत्वाद्घटवदिति बाधकस्य तत्रापि सत्त्वादिति भावः। अन्यथेति। कर्त्तृचेतनयो
र्भेदांगीकार इत्यर्थः। बुद्धेर्नित्यत्वेति। कर्त्तृभिन्नस्य चेतनांगीकारे तस्मिन्सुखदुःखाभावात्संसारमोक्षयोरनुपपत्त्या
पूर्वोक्तरीत्या बुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ। तथा च बुद्धेर्नित्यत्वे तत्सत्त्वनिबंधनस्य संसारस्य सर्वदा
सत्त्वान्मोक्षाभाव एव स्यात्। बुद्धेरनित्यत्वे तु जन्यत्वं स्वीकरणीयं अजन्यस्य नाशासंभवात्। तथा च तदुत्पत्तेः पूर्वं
तत्सत्त्वनिबंधनः संसारो न स्यादित्यर्थः। वस्तुतस्त्विति। तदुत्पत्तेः पूर्वं तदाश्रितादृष्टादेरभावाद्बुद्धेरनापत्त्या संसा
रः कदापि न स्यादित्यवधेयं। असिद्धेरिति। बुद्धौ प्रकृतिकार्यत्वाभावादित्यर्थः। ननु कर्त्तृचेतनजन्यत्वानुमि
तिः परिशेषात् प्रकृतिजन्यत्वविषयिणी स्यादत आह। कर्त्तुर्जन्यत्व इति। कर्त्तृत्वस्य जन्यत्वव्याप्यत्वेऽनुकूलतर्का
भावादित्यर्थः। प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसत्त्वादनादित्वमेव। कर्त्तुरित्यत आह। वीतरागेति।।

वीतरागे जन्मादर्शनादिति न्यायसूत्रं। सरागजन्मादर्शनादितितदर्थः। अनादित्वमिति। स्तनपाने बालस्य प्रवृत्तिर्ने कारा
मुक्तास्र ष्टा साधनता ज्ञानमंतरेण। नच ज्ञानानुभवस्वरूपं बाधात्। स्मरणस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षतया
पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य एवं तत्तत्पूर्वस्य जन्मनः सिद्धो अनादित्वमात्मन इति भावः। अनादि
२० रिसस्य भावत्वे सतीति शेषः। जन्याभावत्वेन नाशहेतुत्वादिति भावः। नच प्रकृतेरिति। प्रकृतिर्माया तस्या गुणेस्स
त्वरजः तमोलक्षणैः क्रियमाणानि कर्माणि भवंति। अहंकारोहमितिप्रत्ययः तेन विमूढः आत्मा अतः करणं
यस्य तथाविधः पुरुषः कर्त्ताहमिति मन्यते इत्यर्थकेन भगवद्वचनेनेत्यर्थः। तेनात्मनः कर्तृत्वाभावप्रतिपादना
दितिभावः। अहमेवेति। तथाच स्वेन स्वतंत्र कर्तृत्वाभाव एवात्मनि प्रतिपाद्यते। नतु कर्तृत्वसामान्याभावइ
तिभावः। प्रकटीकितायमिति। अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं। विविधाश्च पृथक् चेष्टा दैवं चै
वात्र पंचमं मित्यनेन पंचानामपि कर्तृत्वं प्रतिपाद्यते त्रैवं सतीत्यादिना स्वतंत्र कर्तृत्वस्यैव आत्मनो निषिध्य २०
त्वादितिभावः। एवं पुरुषस्यैव कर्तृत्वमस्तु। नच कारणत्वाभावेन कर्तृत्वाव स्वतंत्र साधनीयमितिवाच्यं। स्व
रूपासिद्धेः। कार्यकारणयोरभेदान्नाशस्यादि कारणं च पुरुषस्यैव सपिन सन्ना। कार्यकारणयोरभे

दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यादत आह। न सत्वासत्वाभ्यामिति। बुद्धिसत्वासत्वाभ्यामित्यर्थः। बुद्धिसत्वेंद्रियप्रणा
लिकया तत्परिणामेणायं घट इत्यादिज्ञानेन संबंधो घटादिर्विषयः। स्वाकारज्ञानपरिणामि बुद्ध्या गृहीतासांसर्गिक
त्वसंबंधेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसंपादकः बुद्धिनाशे तु तत्परिणामस्यायं घट इत्या
दिज्ञानरूपस्याभावाद्विषयावच्छेदाभावात्कैवल्यावस्थानं पुंसो मोक्षः। दुःखसंबंधतद्ध्वंसौ संसारमोक्षौ तु न पुंसः
किंतु बुद्धेरेवेतिभावः। ननु पुरुषस्य साक्षात्संबंधे एव विषयस्यास्तु। स एव च तस्मिन् संसारनियामकोस्तु किं
उक्तसंबंधेनेत्यत आह। तस्या एवेति। तथाच विषयबुद्धेरेव संबंधः पुरुषसंबंधः बुद्धिपुरुषयोरसंसर्गाग्रहा
त्। ननु पुरुषे स्वातंत्र्येण संबंधोस्ति मानाभावात्। नच विषयप्रकाशार्थं साक्षात्संबंध एव स्वीकार्यः। किं मुक्ते
पुरुषस्य नित्यपरं पश्येतिवाच्यं। तस्य पुरुषस्वभावनिबंधनत्वेन तत्स्वभावाधीनविषयसंबंधस्यैव सर्वदा सत्वान्मोक्षाभावप्रसंगात्
त्व २ घटप्रकाशकाले घटादिरूपविषयस्वभावाधीनस्य पटादिरूपे चेतस्य संबंधस्य सत्वात्पटादेरपि प्रकाशापत्तेरिति
। यद्वा। बुद्धितो ज्ञानस्याभेदमाह। तस्या एवेति। तथाच बुद्धेः परिणतिर्ज्ञानं नतु बुद्धिरेवेतिभावः।। भेदाग्रहा

मुक्ता प्रका॰ आ॰ लक्षणायत्नमः ॥ ॥ मूलेबुद्धिस्तु द्विविधामता ऽनुभूतिस्मृतिश्च स्यादिति ॥ तत्रानुभूतिः प्रत्यक्षात्मिका एवेति चार्वाकाः श्री
अनुमितिरपीति कणादसुगतौ ॥ उपमितिरपीति के चिन्नैयायिकैकदेशिनः ॥ अर्थापत्तिरपीति प्राभाकराः ॥ अनुप
२१ लब्धिरपीति भाट्टावेदांतिनश्च ॥ संभवैतिह्यरूपापीति पौराणिकाः ॥ तत्सर्वमयुक्तमिति सूचयितुं अनुभूतेश्चातुर्वि
ध्यमाह ॥ अनुभूतिश्चतुर्विधेति । अनुमित्युपमितिशब्दयामिति प्रसिद्धानामनुमित्यादीनां दुर्वारत्वया चा
र्वाकोदितमयुक्तं ॥ अर्थापत्तेस्त्वनुमितावंतर्भावोव्यतिरेकिग्रंथे व्यक्तीभविष्यति ॥ अनुपलब्धेस्त्वभावएवांतर्भा
वः ॥ अन्यास्तं च यथायथमनुमित्यादावंतर्भावइतिभावः ॥ उद्दिष्टासु प्रमासु प्रत्यक्षस्य प्रमोपस्थितत्वात्तल्लक्षणं ल
लं क्षयति ॥ मुक्तावल्यां इंद्रियजन्यमिति ॥ इंद्रियजन्यं इंद्रियरूपादावप्यस्तीत्यतो ज्ञानमिति ॥ अनुमित्यादावतिव्याप्ति या
ब वारणायेंद्रियजन्यमिति ॥ इंद्रियजन्यं विशेषणं दत्तं त्वनुमित्यादावतिव्याप्तिस्तदवस्थैवात आशंकते ॥ यद्यपीति ॥ २१
ननु इंद्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरत आह ॥ ईश्वरप्रत्यक्षं त्विति ॥ तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भा
वः ॥ ननु तस्यैव लक्ष्यत्वे किं मानमत आह ॥ इंद्रियार्थमिति ॥ इंद्रियार्थसंनिकर्षोत्पन्नमित्यनेनेश्वरज्ञानमनुमि

दे

त्यादि च व्यावर्तितं ॥ भ्रमवारणायाह व्यभिचारीति ॥ भ्रमभिन्नमित्यर्थः ॥ एतावता प्रत्यक्षप्रमाया लक्षणमुक्तं ॥ तद्वि
भागमाह ॥ अव्यपदेश्यमिति ॥ निर्विकल्पकमित्यर्थः ॥ न चाव्यपदेश्यपदेन कथं निर्विकल्पकत्वलाभ इति वाच्यं
॥ व्यपदेशः पदवाच्यत्वं तद्विषयकमित्यर्थो हि विशिष्टज्ञानेन तत्सदवाच्यत्वमुपनीतं भासत इति प्राचीनमतानुसारि
त्वात् ॥ अतएव कणादं कणादनामानं मुनिमित्यादिना तत्र संगच्छते ॥ यद्वा व्यपदेशः शब्दप्रयोगः स च विशिष्टज्ञा
नादेवेत्यव्यपदेश्यत्वेन व्यपदेशानर्हो ॥ तेन निर्विकल्पकत्वलाभः ॥ व्यवसायात्मिकमिति ॥ विशिष्टव्यवसाया
त्मिकमित्यर्थः ॥ विशिष्टज्ञानात्मिकमिति यावत् ॥ एवं च सूत्रेंद्रियार्थसंनिकर्षोत्पन्नमव्यभिचारि अव्यपदेश्यं व्य
वसायात्मिकमिति ॥ योजना बोध्या ॥ अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यवधानासंगतेरिति ॥ त
थैवोक्तत्वादिति ॥ ईश्वरप्रत्यक्षात्लक्ष्यत्वस्यैवाभिप्रेतत्वादित्यर्थः ॥ ईश्वरप्रत्यक्षं प्रत्यक्षस्य लक्ष्यत्वमभिप्रेत्याह
॥ अथवेति ॥ ज्ञानकरणकत्वमिति ॥ ज्ञानाजन्यमित्युक्तौ चाव्याप्तिः ॥ विशिष्टज्ञानमात्रस्य विशेषणज्ञान
जन्यत्वादतो ज्ञानकरणकमिति ॥ अनुमित्यादौ व्याप्तिज्ञानस्य करणत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः ॥

मुक्ता प्रकाश अत्राकारणकत्वोदवचेश्वरज्ञानसंग्रहः ॥ अथ निदिध्यासनद्वारा मननादि ज्ञानकरणके योगप्रसत्तेः लक्षणमिदमव्यापक
मिति चेन्न ॥ ज्ञानाकरणकमितिपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभावस्य विवक्षितत्वात् ॥ नचेदं योगिप्रत्यक्षा
व्यापकं ॥ श्रवणादिप्रयोज्यतीनां शाब्दत्वादिनैव जनकत्वेन विशिष्टाभावसत्त्वादिति ॥ अथवा ज्ञानकरणकत्वाव्यभिचा प्याप्य
३२ ज्ञान रिजातिरस्त्यैत्वमिह विवक्षितं ॥ तादृशी च जातिरनुमितित्वादिरेवेति ॥ एतेन अनुमित्यादौ व्याप्तिज्ञानादेः ज्ञान
त्वेन करणतान्येय ज्ञानत्वघटितधर्मावच्छिन्नकरणत्वाप्रसिध्यासंभवोपि प्रयुक्तः इति ॥ व्याप्तिज्ञानस्येत्यत्र चकारान्त
चतुष्टयस्य करणत्वादि त्येनेनान्वयः ॥ नच स्मरणात्मक परामर्शस्थले व्याप्तिज्ञानस्य करणत्वासंभव इति वाच्यं ॥
तत्र व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वात् ॥ नच ज्ञानपदस्य सविषयपरत्वमेवास्तां किं व्याप्तिज्ञानस्य संस्कारद्वारा ३२
तत्र हेतुत्वकल्पनेनेति वाच्यं ॥ इच्छादिना संस्कारात्मानुमितेरनुदयात् सविषयकत्वस्यातिप्रसक्तत्वात् ॥ सादृ
श्यज्ञानस्य ॥ सादृश्यप्रकारकज्ञानस्य ॥ तत्र । अनुमित्यादौ । अनुमितिं लक्षयति ॥ परामर्शेति ॥ परामर्शत्वं
च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं ॥ तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं परामर्श ज्ञानमनुमितिरि
तिफलितं ॥ भवति हि वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं तज्जन्यं पर्वतो वह्निमा

दृश्यवासित्वादिसादिविस्तरभियानोक्तमित्यभिप्रायवानाह । संक्षेप इति । तदाश्रयत्वे । धर्माधर्माश्रयत्वे । अन्यथावि
शेषणसंबंधादिति । इत्यादिप्रतीतिरिति । इत्यादौ ज्ञानादिसंबंधप्रकारेणैव । मनःप्रत्यक्षस्यानुभवादित्यर्थः । परकी
यप्रत्यक्षादेरतीन्द्रियत्वेन हनुज्ञानासंभवात् स्वरूपासिद्धेश्चाह । प्रवृत्तिरेवेति । उक्तप्राय वाद इति शरीरस्य नैवेन
न्यभिसन्नेनोक्तत्वादित्यर्थः । इच्छादीनामभावस्य कंठरवेणानुक्तेः प्रायःपदं । चेष्टायाश्च प्रयत्नज्ञापकत्वे अनुकू
लतर्कमाह । चेष्टायाश्चेति । चेष्टयेति । शरीरसमवायेन चेष्टानुमितस्यावच्छेदकतया प्रयत्नस्य समवायेना
श्रय आत्मेति भावः । आत्मनो [illegible] मनोमात्रजन्यत्वे ज्ञानविषयत्वे हेतुमाह । रूपाद्यभावेनेति । विभुत्वमिति
कालरवात्मदिशां सर्वगतत्वं परममहत्त्वं । इत्यनेनात्मपरममहत्त्वस्योक्तेः पौनरुक्त्यमाशंक्याह । तच्चेति
पूर्वमुक्तादिति । बुध्यादिषट्कं संख्यादिपंचकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनस्युश्चतुर्दशेत्यनेन साध
र्म्यप्रकरणे कथितइत्यर्थः ॥ इति श्री मद्भारद्वाजकुलोद्भवबालकृष्णात्मजमहादेवभट्टकृतौ मुक्तावलीप्र
काशेद्वितीयः परिच्छेदः ॥२॥ मह ॥ चं ॥ द्रा ॥ ये ॥ न ॥ म ॥ नः ॥ ह ॥ भीर ॥ ये ॥ न ॥ नः ॥ श ॥ र ॥ ण ॥ सेनमः

मुक्ता॰ क्षणानामसंभवइत्यतआह॥ वस्तुतइति॥ घटेतिव्याप्तिवारणार्थंसंतं॥ वृत्तित्वंसमवायेनविवक्षितं॥ तेनानुमि श्री
२६ तौकालिकेनघटत्वस्यवृत्तित्वेपिनातिव्याप्तिः॥ ज्ञानत्वानुभवत्वमादायप्रत्यक्षादावतिव्याप्तिवारणायविशेष्य
दलंनतुमनसःकरणतापक्षे॥ ज्ञानाकरणकत्वंप्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तं अतोप्रत्यक्षस्यलक्षणांत
दिक रमाह॥ एवमिति॥ प्रत्यक्षमिति॥ यत्किंचिदुपमितित्वव्यक्तिमादायतद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातित्वमुप
मितित्वं॥ यत्किंचिच्छाब्दव्यक्तिमादायतद्व्यक्तिवृत्तिप्रत्यक्षासमेतजातिमत्वंशाब्दबोधत्वंनिर्वाच्यमित्यर्थः
॥ शाब्दभेदेनानुमित्यादीनांलक्षणकथनमनुभवत्वजातेरंगीकारेण॥ तदनंगीकारेतत्तद्व्यक्तिसमवेतस्मरणास
मवेतधर्मसमवायित्वरूपस्यलक्षणचतुष्टयस्यैकशब्देनवक्तुमशक्यत्वादितिध्येयं॥ उक्तसूत्रेतिइंद्रिया
र्थसन्निकर्षमित्युक्तरूपदर्शितसूत्रानुसारादित्यर्थः॥ घ्राणस्यनिर्विषयकत्वादाह॥ घ्राणेति॥ सुरभित्वादी २६
त्यादिनासुरभित्वादिपरिग्रहः॥ तद्वृत्तीति॥ गंधवृत्तीत्यर्थः॥ उद्भूतपदस्यकृत्यमाह॥ ग्रीष्मेति॥ ऊष्मादावि
त्यादिनाचूर्णप्रविष्टतेजःपरिग्रहः॥ नतत्प्रत्यक्षं॥ नोष्मादिगतंप्रत्यक्षं॥ न्यूनतांपरिहर्तुमाह॥ आलोकसंयोगे
रूप
।इत्यत्रकादिकमपीति।

ति॥ एतस्यचकारणत्वंअंधकारेचाक्षुषापत्तिवारणाय॥ उद्भूतरूपस्यतुपिशाचादीनांवारणायेत्यवधेयं॥ तयोः उद्भूतरू प्रत्यक्ष
ता पालोकसंयोगयोः रूपभिन्नस्यरूपादेरपिचक्षुरिंद्रियेणग्रहादाह॥ रूपत्वादिभिन्नमिति॥ आदिनानीलत्वादिपरि
ग्रहः॥ द्रव्याध्यक्षेति पूर्वान्वयिनस्तूत्तरान्वयीतीतिबोधायतंतुरूपमत्रापिकारणं॥ द्रव्याध्यक्षेद्रव्यदेसतप्रती
कधारणं॥ शंकते॥ बहिरिंद्रियेति॥ ननुकार्याभावस्यकारणाभावस्यप्रयोजकत्वत्तयागगनादौबहिरिंद्रिय
प्रत्यक्षाभावेरूपाभावस्पर्शाभावयोःप्रयोजकत्वकल्पनेगौरवात्तादृशप्रत्यक्षेरूपत्वेहेतुतांकल्पयित्वातदव
च्छिन्नाभावेनैवतादृशप्रत्यक्षाभावेप्रयोजकत्वमुचितमित्यतआह॥ आत्मावृत्तीति॥ आत्मनोबहिरिंद्रिय
जन्यप्रत्यक्षवारणायात्मवृत्तिइति॥ आकाशस्यबहिरिंद्रियजन्यप्रत्यक्षवारणायशब्दभिन्नेति॥ का
लादेःतद्वारणायविशेषेति॥ शंकते॥ रूपस्येति॥ पुनःशंकते॥ इष्टेति॥ प्रतिबंध्योत्तरयति॥ उद्भूतेति॥
उपसंहरति॥ तस्मादिति॥ ननुत्वक्स्पार्शनानंगीकारात्तस्यास्पार्शनवारणायस्पर्शान्यद्रव्यसमवेतत्वस्पार्शनंप्रतित्वक्त्वेतु
कस्पार्शनत्वसमवायत्वेनहेतुत्वस्यवक्तव्यतयावायोःस्पार्शनानंगीकारोनुचितः॥ अन्यथावायुगतसंख्यापरिमाणयो

ग्रहण ... एवं

मुक्ता प्र स्त्वचाप्रसंगादित्यत आह ॥ वायुप्रभयोरिति ॥ प्रभोपादानं दृष्टांतार्थं ॥ न घ्राणेति ॥ तथाच वायुगतसंख्यादिग्रहे दृष्टा कान्ना
१ सावायोस्पार्शनत्वे कोर बाधकाभावइतिभावः ॥ क्वचिदिति ॥ सजातीयसंवलनाभावइत्यर्थः ॥ आदिपदा
३५ त्परिमाणपरिग्रहः ॥ तद्ग्रहश्च भूयोवयवावच्छेदेनत्वगिंद्रियसन्निकर्षस्यतत्रबोध्यः ॥ ननु सजातीयसंवलनदशा
सतत्व यां भूयोवयवावच्छेदेनत्वगिंद्रियसन्निकर्षाभावेच कथं वायुगतद्वित्वपरिमाणयोर्ग्रहणमित्यत आह ॥ क्वचित्संख्याप
रिमाणेति ॥ दोषाद्विति ॥ सजातीयसंवलनादिरूपदोषादित्यर्थः ॥ आहुरित्यनास्वरससत्त्व बीजंतु वायोः प्रत्य
क्षत्वासंदेहेन लाघवान्मूर्तत्वावच्छिन्नप्रतिरूपत्वेनैव कारणत्वमुचितं ॥ नचवायुप्रत्यक्षता संदेहाधीनव्यभिचार
संदेहस्य प्रतिबंधकस्यसत्वात्कथंकारणताग्रहइतिवाच्यं ॥ लाघवतर्काभावविशिष्टस्यैव व्यभिचारसंदेहस्य
प्रतिबंधकत्वात्प्रकृतेच पूर्वोक्तलाघवतर्कसत्वेन तदभावविशिष्टव्यभिचारसंदेहाभावस्यसत्वात् ॥ यद्योक्तं ३५
॥ प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेवकिंनस्यादिति ॥ तदपिन ॥ उपरिदेशे विहंगमइत्यत्र प्रभामंडलस्यैवो
परिदेशतयातत्प्रत्यक्षं विनोपरिदेशेविहंगमइतिप्रत्यक्षानुपपत्तेरित्यधिकमिति ॥ ज्ञानसामान्येति ॥ जन्य

३४ ३४

तिनिज्ञानं इत्यनुमितिलक्षणसमन्वयः ॥ यद्यपीत्यादिप्रत्यक्षादिकमित्यादिनाविशेषणतावच्छेदकप्रकारकनिश्चयविध
यापरामर्शजन्यस्यविशिष्टवैशिष्ट्यबोधस्यपरिग्रहः ॥ परामर्शजन्यमिति ॥ विषयविधयातत्रपरामर्शस्यहेतुत्वादि
तिभावः ॥ कदाचित्केति ॥ धूमवान्पर्वतोवह्निमानित्यनुमितौपक्षतावच्छेदकविधयाधूमस्यभानादितिभावः ॥ नाद्यत्रे
ति ॥ कथितनिश्चयजन्येहेतुविषयेकत्यर्थः ॥ सत्तामादायातिव्याप्तिरितोनुभवत्वव्याप्येति ॥ अनुभवत्वन्यूनवृत्तित्वं
तदर्थः ॥ तेननानुभवत्वजातिमादायप्रत्यक्षादावतिव्याप्तिः ॥ जातिमत्वंच समवायेनविवक्षितं ॥ तेनकालिकसंबंधेन
जातिमति कालेनातिव्याप्तिः ॥ पक्षधर्मतायाअप्रवेशेन लाघवात्लक्षणांतरमाह ॥ अथवेति ॥ अत्रापिसाध्यतावच्छेदक
नु धर्मसाध्यतावच्छेदकसंबंधानां अननुगमादेकव्याप्त्युपादानेऽन्यानुमितौ अव्याप्तिरेकोव्याप्तिमुपादाय तज्ज्ञानकरणक
मुक्तलक्षण कृत्यनुभवत्वव्याप्यजातिमत्वंविवक्षणीयं ॥ ननु अनुमितिंप्रत्यपिव्याप्तिज्ञानत्वेनन करणत्वं किंतु ज्ञान
त्वेनमनस्त्वेनैववा ॥ एवमुपमित्यादौ अपिमनस्त्वेनैककरत्वं ॥ नचकार्यवैजात्यं नस्यादितिवाच्यं ॥ सामग्री
वैलक्षण्यादेवतदुपपत्तेः ॥ नचप्रमाणविभागानुपपत्तिः ॥ क्रियाविशेषत्वदुपपत्तेरतः पूर्वोक्तानुमित्यादित्व

॥ हेतुतावच्छेदकधर्मे हेतुतावच्छेदकसंबंधा ॥

स

[redacted] ज्ञानसामान्ये ज्ञानाजननमिति ॥ प्रमाणमिदमनुपपद्यते ॥ चक्षुरादिनेत्यादिना त्वगादिपरिग्रहः ॥ तदभावादे
व ॥ चक्षुरादिना मनोयोगाभावादेव ॥ ज्ञानादेरभावादेव ॥ नमानमिति ॥ अत्र ज्ञानपदेन मानसभिन्नमन्वयः ॥ ज
भावादित्यत्रापि ज्ञानादेरित्यस्यान्वयो बोध्यः ॥ न प्रत्यक्षमिति ॥ योग्यक्षणसंबंधेनैव मनःप्रत्यक्षे स्वीकारा ल
त् भयोग्यक्षण प्रत्यक्षसामग्र्यंतर्गतस्य ज्ञानादेरभावादेव नात्मप्रत्यक्षमि तिभावः ॥ उद्बोधकाभावादिति ॥ उ
द्बोधकस्य फलबलकल्प्यत्वादिति भावः ॥ इच्छादिव्यक्तेरिति ॥ इच्छाया आदिरिति व्युत्पत्त्या ज्ञानमात्रं
विवक्षितं ॥ तदतींद्रियत्वे ॥ ननु सुषुप्तिप्राक्कालीनस्य निर्विकल्पकरूपत्वात्तदतींद्रियत्वमुभयवादिसि
द्धमेवेत्यत आह ॥ सुषुप्तिप्राक्कालेत्विति ॥ त्वङ्मनःसंयोगस्य चेति ॥ तदस्वीकारे चाक्षुषमपि न स्यादिति भावः
ननु चाक्षुषादिसामग्र्याः स्पार्शनं प्रति प्रतिबंधकत्वाद्व स्पार्शनं तत्रेत्यत आह ॥ परस्परेति ॥ अनुभवानु
रोधादिति ॥ अनुभवानुसरणतयापि स्वेहिसितत्वादन्यथेच्छापत्यादिनत्वदुक्तपत्नर संगतत्वापातादिति भावः ॥ मिश्रमत
स्य स्वीकृत

का

मु॰का॰टी॰ माह॥ अन्ये त्वित्यादिना॥ सुषुप्त्यनुरोधेन॥ सुषुप्तौ ज्ञानानुत्पादानुरोधेन॥ इत्थंचच॥ सुषुप्त्यादिकालेपूर्वोक्तस्यात्मो दिनकरी

३५ नाप्पत्तिरपि न भवतीत्याह॥ चाक्षुषादीति॥ अत्र नव्याः॥ सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यादपि तत्प्रत्यक्षापत्ति त्या

भियात्वङ्मनःसंयोगस्य चर्ममनःसंयोगस्य वा हेतुत्वे॥ सेवतु नयुक्तिसिद्धा॥ तथाहि॥ सुषुप्त्यनुकूलेमनःक्रिया

यामनसा आत्मनो विभागः तत आत्ममनःसंयोगनाशः ततः पुरीतति रूपान्तरदेशेन मनसा संयोगरूपा सुषुप्तिरुत्प

द्यते॥ एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आत्ममनःसंयोगरूपासमवायिकारणनाशात्तत्क्षणे ज्ञानोत्पत्तेरभावात्॥

असमवायिकारणस्य कार्यसहभावेन हेतुत्वात्॥ यद्यपि च कार्यनाशजनकनाशप्रतियोगिन एवासमवायिकार

णस्य कार्यसहभावेन हेतुत्वमिति मन्यते॥ तथापि न सुषुप्त्यव्यवहितप्राक्काले सत्त्वज्ञानव्यक्तेः सुषुप्तिकालप्र

त्यक्षापत्तिभियात्वङ्मनःसंयोगादेर्हेतुत्वं॥ विजातीयात्ममनःसंयोगहेतुत्वेनैव तल्लक्षणावारणात्॥ न च वैजात्ये आत्म ३५

मनःसंयोगादिस्यात्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः॥ त्वङ्मनःसंयोगादेरवच्छेदकतासंबंधेन हे

त्वा व्याप्यत्वात्

मुक्ताप्र० वैशिष्ट्यस्य सांसर्गिकविषयतानियतत्वात् ॥ नचैवं निर्विकल्पकस्य निर्विषयत्वापत्तिस्तुरीयविषयतायास्तत्रांगीकारात् ॥ कारा
त्व एतेन निर्विकल्पस्य घटघटत्वावगाहित्ववद्वैशिष्ट्यस्यावगाहित्वमपि दुर्वारं ॥ घटेंद्रियसन्निकर्षकाले इंद्रियसंबद्धवि
द्वे शेषणतया तत्र वैशिष्ट्यसत्त्वादिति । वैशिष्ट्यानवगाहित्वोक्तिरसंगतेत्यपास्तं ॥ वैशिष्ट्यानवगाहीत्यत्र कारणक
३६ ल्पनीयविशेषणज्ञानस्य वैशिष्ट्यावगाहित्वे तस्यापि विशिष्टबुद्धित्वया विशेषणज्ञानांतरसापेक्षतया विशेष
णज्ञानांतरसापेक्षता स्यात् ॥ एवं तस्यापि वैशिष्ट्यावगाहित्वेऽनवस्थाभिया प्राथमिकविशेषणज्ञानं वैशि
ष्ट्यानवगाह्यवश्यं स्वीकार्यमिति सूचितं ॥ तदेवाह रा विषयता तत्र रहस्यमेव ॥ निर्विकल्पकं ॥ निर्विक प
ल्पकस्वरूपं ॥ लक्षणं तु प्रकारता रहस्यतादृकं प्रत्यक्षमेवेति ध्येयं ॥ निर्विकल्पके मूलोक्तमतींद्रि
यत्वं साधयति ॥ तथाहीत्यादिना ॥ ज्ञानस्य प्रत्यक्षं विषयानवगाहि न भवतीत्यन्वयः ॥ इति प्रत्ययादिति ॥ घटघ
नवगाहित्वेन वज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः ॥ तत्र अहं जानामीति प्रत्यय ॥ विशिष्टवैशिष्ट्यज्ञानेन से ३६
भवतीति ॥ नच विशेष्यविशेषणमितिरीत्यैव निर्विकल्पकानुव्यवसायोऽस्त्विति वाच्यं ॥ रक्तः पटो घटो द्रव्यमिति
२ घटं १

समूहालंबनोत्तरं रक्तघटमहं जानामीति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयता रहस्यज्ञानानुव्यवसायानभ्युपगमा
दिति ॥ महत्त्वमुद्भूतरूपमिति ॥ यद्यपि श्रावणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभावस्तथापि द्रव्यसमवेतप्रत्यक्षादौ तज्ज
न्यतावच्छेदकस्य श्रावणादिसाधारण्यात् श्रावणाद्यन्यत्वनिवेशे गौरवात् प्रयोजनाभावाच्च ॥ तद्विधइत्युक्तमिति ध्ये
यं ॥ आत्मादिवारणायेति ॥ आत्मादौ योग्यताभ्रमापादोषः तद्वारणायेत्यर्थः ॥ सत्यं तद्दोषे च शब्दादित
ये उद्भूतविशेषगुणाः सुखादयः तदा श्रावणस्यैवात्मनि सत्त्वाभावादतिव्याप्तिः ॥ श्रोत्रसत्त्वादिति ॥ तथा च तत्राव्या
प्तिरिति भावः ॥ विशेषपदस्य प्रयोजनं तु भूमिकामाह ॥ उद्भूतत्वमिति ॥ जनकत्वानुपपत्तेरिति ॥ एकैकस्य
भावत्ति कारणतावच्छेदकत्वे व्यभिचारात् कूटत्वेन च तथा अकारणतावच्छेदकत्वादिति भावः ॥ इंद्रियावयववार
णायेति मनःपदमित्यनेनान्वितं ॥ नवीनमते मनःपदप्रयोजनमाह ॥ कालादाविति ॥ समवायेन घटा
द्यभावादीनां कालसत्त्वेपि न तत्प्रत्यक्षं ॥ योग्यानुपलब्धेरभावात् अतो रूपाभावपर्यंतानुधावनं ॥ तद्वारणा
येति ॥ कालादेर्वारणायेत्यर्थः ॥ अन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रशब्दसंबंधे समवाय इत्यभावादाह ॥

मुक्ता० टी० व्यापारः संनिकर्ष इति ॥ द्रव्यप्रत्यक्षमिति ॥ द्रव्यत्वनिष्ठलौकिकविषयतासंबंधेनप्रत्यक्षमित्यर्थः ॥ एवमग्रेपि ॥ दिनकरी
ति ॥ द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबंधेनप्रत्यक्षं इंद्रियसंयुक्तसमवेतसमवायजन्यमित्य
२७ र्थः ॥ ननुद्रव्यप्रत्यक्षेंद्रियसंनिकर्षत्वेनहेतुत्वेप्रागभावसंयोगस्य चाक्षुषापत्तिः ॥ एवमंधकारे घटच
क्षुः संयोगात् स्पार्शनापत्तिश्चेत्यत आह ॥ वस्तुतस्त्विति ॥ नन्वेवमात्मप्रत्यक्षानुरोधेनमनः संयुक्तसम
वायेनैव त्र्यणुकादेश्चाक्षुषापत्तेरत आह ॥ परंत्विति ॥ परंपरया स्वाश्रयत्वसमवायसंमवायसं
बंधेन ॥ उद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुः संयुक्तसमवायस्येति ॥ अत्रचक्षुर्घटितचक्षुः सन्निकर्षो
द्भूतत्वादीनांप्रत्यक्षवारणायोद्भूतेति ॥ तथामहत्वावच्छिन्नचक्षुः संयुक्तसमवायस्यत्रसरेणावभावाच्चा
क्षुषानुपपत्तिरतः संयोगस्यप्रत्यासत्तिरितिभावः ॥ संयुक्तसमवेतसमवायेन संयुक्तसमवायस्यना २७
न्यथासिद्धिरित्याह ॥ द्रव्यसमवेतेति ॥ तादृशेति ॥ महत्वावच्छिन्नेत्यर्थः ॥ तथाचमहत्वावच्छिन्नचक्षु

तुलापेक्षया समवायेन । मनः संयोगस्यहेतुत्वेलाघवात् ॥ त्वङ्मनः संयोगादेर्हेतुत्वेन चाक्षुषादिसामग्र्याः प्रतिबंधकत्वकल्प
नेगौरवाच्च ॥ एतेनयत्रमनः क्रियथानपुरीतति संयोगरूपासुषुप्तिः ॥ किंतुपुरीततिततिक्रियैयेवात्वसंयुक्तेनमनसा
पुरीततिसंयोगरूपासुषुप्तिस्तत्रपूर्वोक्तापत्तिवारणायत्वङ्मनः संयोगादेर्हेतुत्वमित्यपास्तं ॥ पुरीततिक्रियाजन्यमनः पुरी
ततिसंयोगस्य सुषुप्तित्वाभावाच्च ॥ अतएवचयदावचेतसाक्रामनपुरीततिंमनुविशति । तिग्रंथकारेणं लेखनंसंगच्छ
तइति ॥ वस्तुति ॥ मनोग्राह्यत्वस्यसार्वत्रिकत्वादाह ॥ मनोजन्येति ॥ मनोमात्रजन्येत्यर्थः ॥ न्यूनतांपरिहरति ॥ एव
मिति ॥ निर्विकल्पकेप्रमाणंदर्शयति ॥ चक्षुः संयोगादीति ॥ विशेषणज्ञानस्यकारणत्वादिति । कदाचिद्घटइत्या
कारकं स्वरूपतोघटत्वप्रकारकं कदाचित् ॥ जातिमानितिज्ञानंतु घटत्वप्रकारकं ज्ञानंजायतेतत्रानुभवसा न
घटत्वप्रकारकसाक्षिकं तन्निर्वाहायघटत्वांशे अन्याप्रकारकंबुद्धौतादृशघटत्वज्ञानत्वेनघटत्वांशेजातित्वप्रकारकघटत्व ॥ विशिष्ट
बुद्धौचतादृशघटत्वज्ञानत्वेनहेतुत्वस्यावश्यकत्वादितिभावः ॥ वैशिष्ट्यानवगाहीति ॥ वैशिष्ट्यनिष्ठसांसर्गिकवि
षयताशून्यमेवेत्यर्थः ॥ वैशिष्ट्यसांसर्गिकविषयतानिरासेनेवघटघटत्वयोर्वैशिष्ट्यताप्रकारताशून्यत्वंलब्धं ॥ तथा

मुक्ताटीका तिभावः॥ तत्र योग्यानुपलब्धेरभावप्रत्यक्षेहेतुमाह॥ तथाहीति॥ घटादिज्ञाने॥ घटादिभ्रमे॥ नचघटभ्रमहेतुदोषए दिनकरी०
वतत्प्रतिबंधकः॥ अन्यथाभ्रमोत्पत्तिकाले तदभावप्रत्यक्षापत्तिरितिवाच्यं॥ विनष्टदवस्थादोषाद्यत्रभ्रमस्तत्र
३९ भ्रमोत्पत्तिकालप्रतिबंधकाभूत दोषाभावस्यसत्वादभावप्रत्यक्षापत्तेः॥ अभावोपलंभेनादींद्रियजन्यतत्संबंधा
वच्छिन्नतदभावलौकिकप्रत्यक्षे प्रतियोग्युपलंभाभावः तादींद्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारक
कोपलंभाभाव इत्यर्थः॥ इंद्रियांतर जन्ये आनुमानिके चतदुपलंभेसत्यपितदभावप्रत्यक्षात्तदींद्रियज
न्येति॥ अभावप्रत्यक्षेहेतुःप्रतियोग्यारोपसत्वेपिभावप्रत्यक्षादनाहार्येति॥ तत्र॥ प्रतियोग्युपलंभाभावे॥ अपेक्षितेति॥ तेन नजलपरमा
ण्वादौ पृथिवीत्वाभावादेःप्रत्यक्षमितिभावः॥ मणिकृन्मतानुसारेणयोग्यतांनिर्वक्ति॥ साचेति॥ प्रसंजितआपादितः॥ सउपलंभाभावेप्र
भावप्रत्यक्षेहेतुरिति॥ अत्र तदधिकरणविषयकाभावप्रत्यक्षेतदधिकरणेतदापादकापत्तियोग्यतदुपलंभस्यविषयतासंबंधावच्छि का ३९ व
न्नप्रतियोगिताकाभावोहेतुरित्यर्थः॥ उपलंभेदेतेधिकरणतदापादकापत्तियोग्यत्वंचतत्प्रतियोगिसत्वनिष्ठव्याप्तिनिरूपकत्वं॥ अत्र
चतदापादकापत्तिर्यत्रनोत्पन्नातत्रतदभावप्रत्यक्षानुपपत्तेरितियोग्यत्वंनिर्वक्तुः॥ नचप्रतियोगिसत्वस्योपलंभव्याप्यत्वेननिर्विशेषितस्यो
पलंभकसामग्र्यंतरविरहेप्रतियोगिसत्वेप्युपलंभाभावात्॥ किंतुमहदुद्भूतरूपाद्यवच्छिन्नस्यैव॥ एवंचमहत्वादिविशिष्टपृथिवीत्व

स्योपलंभव्याप्यत्वात्जलपरमाण्वादौपृथिवीत्वाभावप्रत्यक्षापत्तिरितिवाच्यं॥ तदधिकरणवृत्तिधर्मावच्छिन्नत्वस्ययोग्यताघटकीभूतव्या
प्त्यंशेनिवेशात्॥ महत्वस्यजलपरमाण्ववृत्तित्वेनतादृशव्याप्तौ तादृशधर्मावच्छिन्नत्वाभावात्॥ नचगंधवदणुभिन्नत्वस्यापिपृथिवीत्वस्यतदुप
लंभव्याप्यत्वात्गंधवदणुभिन्नत्वस्यजलपरमाणुवृत्तित्वाच्चतद्दोषतादवस्थ्यंइतिवाच्यं॥ योग्यताघटव्याप्तौप्रतियोगिग्राहकातिरिक्तधर्मावच्छि२ न
च्छिन्नत्वस्यापिनिवेशात्गंधवदणुभिन्नत्वादेश्चप्रतियोगिग्राहकातिरिक्तत्वेनतादृशधर्मानवच्छिन्नत्वस्योक्तव्याप्तावभावात्॥ नचप्रतियोगिग्राह
३ कत्वंप्रतियोगिग्रहजनकत्वंतच्चगंधवदणुभिन्नत्वपृथिवीत्व[illegible]तिसमूहालंबनात्मकलौकिकप्रत्यक्षेविषयविधयाहेतुत्वात्गंधवदणुभिन्नत्वस्या २
पिप्रतियोगिग्रहजनकत्वंतच्चगंधवदणुभिन्नत्वपृथिवीत्वेयवप्रतियोगिग्राहकत्वपदार्थात्॥ अथैवं
प्रत्यक्षतमितिवाच्यं॥ प्रतियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वरूपेवप्रतियोगिग्राहकत्वपदार्थात्॥ अथैवं
पित्वाच्चप्रकारतानिरूपितलौकिकविशेष्यताप्रसिध्यातत्घटितनिरुक्तयोग्यानुपलंभविरहात्तदभावप्रत्यक्षंनस्यादितिचेन्न॥ नहिवयंसर्वत्राभावप्र
त्यक्षेनिरुक्तयोग्यानुपलंभस्यहेतुत्वंब्रूमः॥ किंतुयोग्यस्याभावप्रसक्तेऽयोग्यपिशाचाद्यभावस्यतदधिकरणप्रत्यक्षेतुतदधिकरणीय गि
त्वप्रसंजनप्रसंजितप्रतियोगिकत्वतदधिकरणीयत्वोपलंभस्यविषयतासंबंधावच्छिन्नस्यत्वाभावस्यएवप्रतियोगितानिष्ठोहेतुः॥ अ
त्वाप्यापादनस्यसर्वत्रासंभवेनतदधिकरणीयत्वप्रसंजनप्रसंजितत्वं॥ तदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकत्वं॥ जातित्वादि
विशिष्टस्यस्तंभत्वनितोपलंभव्याप्यत्वात्स्तंभेपिशाचत्वाभावप्रसक्तं॥ जातित्वविशिष्टस्यपिशाचत्वजातित्वस्योपलंभव्याप्यत्वा

गु०का० टीका त्वपिशाचे स्तंभत्वाभावप्रसक्तं ॥ एवं तादात्म्येन स्तंभवत्तित्वपिशाचवत्तित्वयो रूपलंभव्याप्यत्वाव्याप्यत्वाभ्यां स्तंभपिशाचयोः पिशा दिनकरी
चभेद स्तंभभेदयोः प्रत्यक्षसिद्धत्वात् प्रत्यक्षत्वेप्युपपादनीयइति ॥ नचाक्षुषप्रत्यक्षइति ॥ अनुपलंभेविद्यमानेपि निरुक्तयोग्यता
विशिष्टस्यतत्राभावादितिभावः ॥ आपादयितुंशक्यत्वादितिभावः ॥ तथाचसमानेंद्रियजन्योपलंभव्याप्यत्वस्ययोग्यता
घटकत्वान्नतत्रचाक्षुषमितिभावः ॥ ननुजातित्वादिविशिष्टस्य तेजोवृत्तित्वस्योपलंभव्याप्यत्वात्तेजसि गुरुत्वाभावप्र
त्यक्षापत्तिरेवं स्तंभे पिशाचत्वाभावप्रत्यक्षवत् पिशाचाभावस्यापिप्रत्यक्षापत्तिरत आह ॥ गुरुत्वादिकमिति ॥ आदिपदेनपिशाचा
द्विपरिग्रहः ॥ अयोग्यपिशाचत्वजातेरभावस्यप्रत्यक्षत्वाद्गुरुत्वादिकमित्युक्तं ॥ नयोग्यः ॥ नप्रत्यक्षविषयः ॥ अशक्यत्वादिति ॥ निरुक्त
योग्यताघटकव्याप्यप्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्यनिवेशात् उक्तेनच जातित्वविशिष्टतेजोवृत्तित्वस्योपलंभव्याप्यत्वेपि जातित्वस्यगु
न रुत्वावृत्तित्वेनतादृशव्याप्यत्वेप्रतियोग्यवृत्तिधर्मावच्छिन्नत्वाभावादितिभावः ॥ नचतदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिक:
त्वदधिकरणीयत्वोपलंभस्याभावएवेंद्रियकघटाभावादिप्रत्यक्षेहेतुरस्तां किंपूर्वोक्तयोग्यानुपलंभहेतुतयेतिवाच्यं ॥ तथासतिपरमाण्वा २९
दौमहत्वाद्यभावप्रत्यक्षानुपपत्तिरिति ॥ अथवाउद्भूतरूपाभावेति ॥ रूपत्वावच्छिन्नाभावस्यातींद्रियानुद्भूतरूपप्रतियोगिकत्वेन प्रत्यक्षा
संभवादुद्भूतेति ॥ एवमादयइत्यादिनाप्रभायांउद्भूतस्पर्शाभावपरिग्रहः ॥ प्रत्यक्षाविषयत्वेनकारणत्वस्यैकत्वात्तेनैवगुरुत्वाद्यतींद्रि
याभावस्य प्रत्यक्षवारणेतदनुरोधेनतदधिकरणीयत्वस्यादि द्वितीययोग्यानुपलंभस्यहेतुत्वेन स्वीकार्यो इत्यभिप्रायवा

संयुक्तसमवेतसमवायस्य त्रसरेणुरूपेऽभावाच्चाक्षुषानुपपत्तिरतोसंयुक्तसमवायप्रत्यासत्तित्वमितिभावः ॥ एतत्प्रसंगेन पूर्वरूपाव
च्छिन्नत्वमग्रेचालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगेतत्वयोजनमभिहितमितिबोध्या ॥ स्पार्शनप्रत्यक्षेत्वक्मनोनिकर्षस्यकारण
त्वंचप्रपंचयति ॥ एवमिति स्पार्शनेन ॥ पूर्ववदेवेति ॥ परमाणुघटितत्वक्मनःसन्निकर्षेणस्पार्शनत्वस्पार्शनवारणाय महत्वावच्छिन्नत्वप्र
णघटितसन्निकर्षात्सचाद्विस्पार्शनवारणाय स्पर्शावच्छिन्नत्वादिविशेषणंबोध्यमित्यर्थः ॥ श्रोत्रावच्छिन्नेति ॥ सकलपुरुषा
णांसर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति ॥ यद्यपींद्रियसंयुक्तविशेषतेंद्रियसंयुक्तविशेषणता मादिक्रमेणबाहुल्य समवेत
मेव तथापिविशेषणत्वेनैकरूपेणविभागः ॥ नचैवंसमवायत्वेनचतुर्णामननुगमप्रसंगः ॥ परिभाषाया अपर्यनुयोज्यत्वात्
॥ समवायेनप्रत्यक्षमिति ॥ संबंधप्रत्यक्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वादितिभावः ॥ ननुविशेषणतयातत्तद्विषयासंगति
॥ विशेषणतयाप्रत्यासत्तेरभावात् ॥ नचतत्प्रत्यासत्तेरनभ्युपगमेभावप्रत्यक्षानुपपत्तिरितिवाच्यं ॥ इष्टापत्तेरनुपलंभ
स्यैवतत्प्रत्ययस्यैवोपगमात् ॥ नचसमवायप्रत्यक्षानुरोधेनतद्विशेषणताप्रत्यासत्तिस्वीकारः ॥ समवायानंगीकारात्
॥ अतएवाभावप्रत्यक्षेइंद्रियंजनकरणं किंतु योग्यानुपलब्धिरेवेति भाट्टानामाक्षेपंदूषयितुं मूलेयदित्यादीति ॥ तथा
चेदिंद्रियाणामभावप्रत्यक्षेजननेपि योग्यानुपलब्धेः सहकारितामात्रेण निर्वाहे अतिरिक्तप्रमाकल्पनमनुचितमे
३ प्रयोजकत्वात् ३ न

मुक्ता० टीका विशेष्यकज्ञानप्रकारस्य धूमत्वादेर्धूमांतरे सत्वात्तद्धूमांतराणां सामान्यलक्षणया ज्ञानापत्तिः ॥ नचतदा धूमोनेंद्रियसं दिनकरी
बंधः ॥ ज्ञानलक्षणात्मक सन्निकर्षस्य धूमे सत्वात् ॥ नचतत्रैव क्षणसामान्यलक्षणाजन्यज्ञानस्वीकारे क्षतिवि
४० रहइतिवाच्यं ॥ तन्मूलकज्ञानधारापत्तेर्दुर्वारत्वादित्यत आह ॥ लौकिकेत्याद्यइति ॥ अत्रैसन्निकर्षस्य विशेषण लौकिक
विधयाघटकत्वंबोध्यं ॥ अन्यथा तत्र धूमे पूर्वकालीन चक्षुः संयोगमादाय तद्दोषतादवस्थ्यमितिध्येयं ॥ इत्थं
पत्तलक्षणं ॥ यत्र चक्षुः संयोगविद्यमाने पि दोषान्न धूमचाक्षुषे ॥ किंतु धूमत्वप्रकारकं स्मरणं तत्र धूमत्वसामान्य
लक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तदिंद्रियजन्यत्वस्यवाच्यत्वात् ॥ ननु इंद्रि
यसंबंधे यत्र लौकिकः संबंधः ज्ञानप्रकारः यत्र ज्ञानस्य तदिंद्रियजन्यत्वं चेद्विवक्षितं ॥ तदाणुत्वेनयत्किंचि
दणुत्वाप त्रिवत्वाणुत्वसामान्यलक्षणया सकलाणुगोचरमानसबोधेनस्यात्तदाणोर्मनसालौकिकसं ४०
बंधस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह ॥ इदंचेति ॥ तथा च बहिरिंद्रियेण सामान्यलक्षणया ज्ञान
जननीयतद्विवक्षितं ॥ नतु मानससामान्यलक्षणाजन्यज्ञाने इति ॥ नोक्तदोष इति भावः ॥ आसत्तिराश्रयाणांत्वि

स्यपरंपरया कपालादाव ४
४ तेन संबंधेनेति ॥ अन्यथा समवायेन ज्ञानप्रकारीभूत घटत्वादिसामान्यप्रत्यासत्त्या कालादिज्ञानापत्तेरिति भावः ॥ ४
त्यादिमूलमवतारयितुं भूमिकामारचयति ॥ परंत्वित्यादिना ॥ भूतलेइत्यस्य ज्ञातेइत्यनेनान्वयः ॥ भूतलादीनां इत्यादिना संयोग
ननद्धटाधिकरणद्रव्यांतरपरिग्रहः ॥ अत्रेदंबोध्यमिति ॥ ज्ञायमानमनियतं सामान्यं तत्र प्रत्यासत्तिरितिबोध्यमित्यर्थः ॥ परंप
रयाप्रत्यासन्नस्य घटत्वादेरेवप्रत्यासत्तित्वसंभवात् ॥ किंत्वित्यादिना वक्ष्यमाणदोषासंगतेराह ॥ परंतु इति ॥ तथा च तत्र घ
क्ष्यमाणदोषसंगति टत्वज्ञानो[redacted]रिति [redacted]ः ॥ किंचिति ॥ एवंचेत्यर्थः ॥ कंचेति ॥ कुलालजन्यत इति ॥ इदमापाततः ॥ सामान्यलक्षणाघ
टकीभूत लौकिकसन्निकर्षस्य विशेषणत्वविवक्षणेन कालांतरीयसंयोगमादायातिप्रसंगस्याभावादिति ॥ तस्मा
समवाया त्पूर्वोक्तदोष एवात्र कल्पेबोध्यः ॥ नचतत्र स्वसमवायिसंबंधेन घटत्वादेरेवासत्तितया पूर्वोक्तदोषो पिनसंभवती
तिवाच्यं ॥ स्वसमवायिसमवायादिसंबंधेन घटकपालादिकंयदानज्ञातं किंतु तद्धट एव समवायादिना ज्ञातस्तदुतरम
पि तद्धटाश्रयकपालानां ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्या उपपादनासंभवात् ॥ एवं ज्ञायमानसामान्य
स्यप्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्रस्यप्रत्यक्षतापत्तिः ॥ तथाविधसामान्यज्ञानस्य प्रत्या
सत्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वात् नगुरुधीयत्वनिवेशाद् इति लाघवमितिबोध्यं ॥ तेन सामान्यविषयकज्ञान
त

मुक्ता० टीका मिति ॥ इंद्रियसंबद्धविशेष्यकं ज्ञानमित्यर्थः ॥ यद्वा ॥ सामान्यविषयकं ज्ञानमित्यर्थः ॥ सामान्यविषयक ज्ञानत्वं प्रत्यासत्तिताव दिनकरी
४१ च्छेदकमिति यावत् ॥ तथाचात्रकल्पे इंद्रियसंबद्धविशेष्यकत्वप्रकारकत्वं तदिंद्रियजन्यत्वानि ज्ञानविशेषणानि नोपादेयानी
पूर्वमते तु ति ॥ तदिंद्रियजन्यत्वादेर्निवेशेनेंद्रियभेदेन कार्यकार्यकारणभावकल्पनेन च गौरवमित्यर्थः ॥ एतन्मते च निर्विकल्पकसाधा
स्मरणसाधारणं रणं च सामान्यज्ञानमात्रप्रत्यासत्तिः तथाच घटत्वप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकं घटत्वज्ञानत्वं च कारणतावच्छेदकं स्व
प्रकारीभूतघटत्वाश्रयत्वं कार्यतावच्छेदकः संबंधः ॥ स्वविषयघटत्वाश्रयत्वं च कारणतावच्छेदकः संबंधः ॥ चक्षुःसंयो
टीकायां तत्र संगस्य योगादिशून्यकाले अलौकिकत्वात्र संगस्य वक्ष्यमाणत्वादिंद्रि जन्यत्वेनैव वारणादिति ध्येयं ॥ अणुत्व ज्ञानमात्रेणैव सकला
णुगोचरमानसबोधादयादाह ॥ बहिरिति ॥ आलोकसंयोगमित्यादिना दोषाभावपरिग्रहः ॥ नजन्यतइति ॥ अयमाशयः ॥
यदा घटे चक्षुःसन्निकर्षादिघटिता चाक्षुषादिसामग्री तदुत्तरक्षणे घट इति चाक्षुषे सैव सामान्यलक्षणा तदुत्तरक्षणेऽस
कलघटविषयकं ज्ञानं जन्यत इति प्राचीनमते क्षणैकविलंबः कल्प्यते तत्र च मानाभावः ॥ यदेव घट इति चाक्षुषमुत्प
द्यते तदेव सन्निकृष्टघटांशे लौकिकमन्यघटांशेऽलौकिकमित्यभ्युपगमात् तथाच सामान्यलक्षणाजन्यघटत्वप्रका ४१
त्व रकं लौकिकचाक्षुषमिति फलितं ॥ तथाच चक्षुःसन्निकर्षादिशून्यकालव्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिण्या विरहादेव
चाक्षुषत्वस्य व्यापकं घटत्वप्रकारक

रु

संसर्गाभावे योग्यतामाह ॥ संसर्गेति ॥ प्रतियोगिनो योग्यतेति ॥ योग्यमात्रप्रतियोगिकत्वे सति योग्यमात्रधर्मावच्छिन्नप्रतियो
गिताकत्वमित्यर्थः ॥ अत्र द्रव्यसामान्याभाववारणाय मात्रेति ॥ गुरुत्ववद्घटाद्यंताभाववारणाय विशेष्यदलं ॥ रूपगुरु
त्वान्यतरत्वावच्छिन्नाभाववारणाय विशेष्यदले मात्रेति ॥ अधिकरणयोग्यत्वं चेति ॥ योग्याधिकरणत्वं चेत्यर्थः ॥ इ दति
वाय्वादौ न दं च अभावग्राहकयोग्यसन्निकर्षार्थं ॥ एवं स्तंभे पिशाचो न्योन्याभावप्रत्यक्षमिति भावः ॥ अन्योन्याभावयोग्य
त्वं तु जात्यवच्छिन्नप्रतियोगिताकत्वजात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरदेव ॥ तेन स्तंभे पिशा
चान्योन्याभावपिशाचवदन्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिः न्यत्र विस्तरः ॥ धूमत्वादिसामान्यलक्षण्या रिस
इंद्रियजन्यत्वाभावाद्व्यापारत्वकथनमसंगतमत आह ॥ व्यापारः सन्निकर्ष इति ॥ धूमत्वादेरिंद्रियप्रतियोगिक यद्यपि
त्वाभावात्संनिकर्षत्वमयुक्तं ॥ तथापि संयोगस्येंद्रियप्रतियोगिकत्वात्तद्घटितस्येंद्रियसंयुक्तविशेष्यकज्ञानप्र
कारीभूतधूमत्वादेः प्रत्यासत्तितानिर्वाहः ॥ तत्र ॥ सामान्यस्वरूपं च ॥ अत्र यदीति ॥ इंद्रियसंबद्धसामान्यं प्रत्यासत्तिरित्युक्त
तेइत्यर्थः ॥ ननु यत्र चक्षुःसन्निकर्षेण धूम इति ज्ञानं जनितं तत्र चक्षुःसंयोगविगमेपि तादृशज्ञानमादायेंद्रियसंबद्धे

शेषधर्मांतरस्याग्रहीतयासामान्यलक्षणयातज्ज्ञानानिर्वाहादितिभावः।। ननुधर्मांतरस्यसौरभत्वां
शेऽग्रहेपिसौरभत्वसामान्यलक्षणयैवसौरभत्वादेर्भानमस्तुसौरभत्वप्रकारकसौरभविशेष्यक
कत्वस्यैवतत्कार्यतावच्छेदकत्वादितिचेन्न।।सौरभत्वादिविषयतायाःप्रयोजिकायाःस्ववि‍ष
यसौरभत्वादिमत्वरूपसामान्यलक्षणसंबंधस्यसौरभत्वेऽभावेनसामान्यलक्षणयातज्ज्ञाना
निर्वाहात्।।सौरभत्वसामान्यलक्षणायाःकार्यतावच्छेदकेसौरभत्वप्रकारप्रकारतानिवेशप्र
यो[illegible]जनाभावाच्च।।नचज्ञानलक्षणायाःकारणतांतरकल्पनेगौरवमितियैवसामान्यप्रकार
कत्वस्यैवकार्यतावच्छेदकेप्रवेशातिशंक्यं।।विशेषणज्ञानहेतुतयैवनिर्वाहेज्ञानलक्षणा
याःकारणत्वांतरकल्पनाविरहादिति।।ननुविशेषणज्ञानजन्यतावच्छेदकंविशिष्टबुद्धि
त्वंज्ञानलक्षणायास्तुविशिष्टप्रत्यक्षत्वमितिनकृत्स्नेननिर्वाहः।।एवंचज्ञानलक्षणाया
स्वविषयमुख्यविशेष्यकमानसंतत्रविशेषणज्ञानकारणतायानिर्वाहस्तत्राह।।एवमिति।

ज्ञानलक्षणया।।ज्ञानलक्षणयैव।।न तच्चधूमत्वज्ञानरूपसामान्यलक्षणायाःस्वविषयधर्म
ताश्रयत्वसंबंधेनधूलीपटलेऽभावेसामान्यलक्षणयानुव्यवसायेधूलीपटलभानासंभ
वादितिभावः।।सर्वदैवेति।।व्याप्यभावे[illegible]त्यर्थः।। ।।इतिप्रत्यक्षनिरूपणंसमाप्तं।।
।। ।।श्री।। ।।श्री।। ।।श्री।। ।।श्री।। ।।श्री।। ।।श्री।। श्री।। ।।।।श्री।। ।।

॥ ॥ प्रत्यक्षपरिच्छेदः समाप्तिमगात् श्रीरस्तु ॥ ॥

112/5

नचाक्षुषं ॥ सामान्यलक्षणापीति ॥ यद्विज्ञानरूपेपि ॥ अत्रस्थायद्विशब्दः सामान्यलक्षणापीत्युत्तरं योज्यः ॥ सामान्यलक्षणा
स्वीकारबीजमाह ॥ अत्रेति ॥ अयमर्थः ॥ अयमभिप्रायः भानं ॥ विषयता ॥ नसंभवतीति ॥ प्रत्यक्षविषयतायाः सन्निक
र्षाश्रयत्वव्याप्यत्वादितिभावः ॥ वह्निसंबंधस्यगृहीतत्वादिति ॥ तथाच प्रत्यक्षधूमेव्याप्तिनिर्णीतत्वान्नतद्विषयकोऽ
व्याप्यत्वसंशयः संभवतीतिभावः ॥ ज्ञानलक्षणास्वीकारबीजमाह ॥ एवमित्यादिना ॥ कथंस्यादिति ॥ चंदनखंडस्य
चाक्षुषेजायमाने उपस्थितसौरभमानंनस्यात् सौरभांशेचक्षुः सन्निकर्षाभावादित्यर्थः ॥ सौरभत्वप्रकारकलौकि
कप्रत्यक्षजनकसामग्र्याः सहकारिण्याविरहेण सौरभत्वसामान्यलक्षणयापिसौरभमानंनसंभवतीतिभा
वः ॥ सुरभिचंदनमित्यादौ सौरभादेभानं सौरभत्वादिसामान्यलक्षणयैवसंभवति सौरभत्वप्रकारकलौ
किकप्रकारक प्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतर सामग्रीसहकारिणेवतस्याः फलजनकत्वां
गीकारात् ॥ प्रकृतेचद्वितीयसामग्र्याः सहकारिण्याः सत्वादित्यभिप्रायेणाह ॥ यद्यपीति ॥ सौरभत्वस्यभा
नमिति ॥ स्वरूपतः सौरभत्वस्यभानमितिभावः ॥ ज्ञानलक्षणया ॥ ज्ञानलक्षणयैव ॥ तदानीं सौरभत्वं

हेतुतापत्ति तस्मादनुमितिं प्रति मनस्त्वेनैव करणत्वमित्याहुः॥ लिंगमनुमितिकरण मिति॥ अनुमितौ परामर्शमात्रेण हेतुत्व
मिति लिंगपरामर्शः॥ तथाच विशिष्टस्य कारणताग्रहे विशेषणस्यापि कारणताग्रहात्॥ परामृश्यमाणलिंगस्य पराम
र्शस्य वा हेतुत्वे तत्र विनिगमनाविरहेण उभयोर्हेतुतासिद्धौ तत्र व्यापारांतराभावान्न परामर्शस्य करणता किंतु लिंगस्ये
वेत्याशयः॥ लिंगस्य तदानीमभावादिति॥ न च परामर्शरूपव्यापारसंबंधेन तदानीं लिंगमस्त्येवेति वाच्यं॥ अतीता
दिलिंगस्य परामर्शजनकतया परामर्शस्य तद्व्यापारत्वासंभवात्॥ इदमुपलक्षणं॥ लिंगस्य हेतुत्वे चैत्रीयपरामर्शविषया
ल्लिंगान्मैत्रस्यानुमितिप्रसंगः॥ तत्पुरुषीयत्वनिवेशेन गौरवं मम त्वन्मते तु सामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावेनैव न
तिप्रसंगात् तत्पुरुषीयत्वनिवेशानैमिति लाघवमित्यपि बोध्यं॥ तत्र व्याप्यस्य पक्षेण सह वैशिष्ट्यज्ञानं च॥ ननु परस्परं
व्यभिचार इत्यत आह॥ अनुमितिस्त्विति॥ कार्यतावच्छेदकस्य परस्परानुमितिव्यावृत्तत्वान्न व्यभिचार इति भावः॥
पक्षविशेष्यकमेव सर्वेषामनुमितौ नियतमिति नवीनमतमाह॥ द्विविधादपीति॥ कारणतावच्छेदकं परामर्शद्वयसाधा
रणं व्याप्यपक्षोभय वैशिष्ट्यावगाहि निश्चयत्वं मतो न व्यभिचार इति भावः॥ द्विविधयोरपि परामर्शयोः स्वाव्यवहि रू
तोत्तरानुमितिं प्रति तादूप्येण हेतुत्वमित्येके चित्तु॥ वस्तुतोनुभवानुरोधात् पक्षविशेष्यकपरामर्शस्यैव हेतुत्वमतः स्वचे

वह्निव्याप्यधूमवां श्चायमित्याकारकः पक्षविशेष्यक एवानयः सर्वसंमत इति ध्येयं॥ मीमांसकशंकते॥ नन्विति॥ ज्ञा
नं विनापीत्यस्यानुमितेर्दर्शनादित्यनेनान्वयः॥ ज्ञानद्वयादेव॥ ज्ञानद्वयादपि॥ विशिष्टवैशिष्ट्यावगाहिज्ञानमिति भाव
प्रधानो निर्देशः॥ सर्वत्रनकारणमिति॥ अनुमितित्वावच्छिन्नं प्रति न कारणतावच्छेदकमित्यर्थः॥ आवश्यकत्वादिति॥ व्याप्य
तावच्छेदकप्रकारकपक्षधर्मताज्ञानद्वयस्योभयमतसिद्धनियतपूर्ववर्तितावच्छेदकत्वादित्यर्थः॥ ननु ज्ञानद्वयस्थलेपि
विशिष्टज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह॥ विशिष्टज्ञानेति॥ व्याप्यतावच्छेदकेति॥ अयमालोको धूमो वेति
संदेहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः॥ वह्निव्याप्यवानिति॥ वह्न्यभाववद्वृत्तिमानित्यर्थः॥
नवधूमसामानाधिकरण्यादिरूपव्याप्तिविशिष्टवानित्यर्थः॥ तत्र हेतुतावच्छेदकभानं नेयमात्॥ अनुमित्युत्तेरि
व्याप्य ति॥ तथाच तावच्छेदकप्रकारकपक्षधर्मताज्ञानस्थले त्र व्यभिचारात्तेन रूपेण हेतुत्वमिति भावः॥ ननु तत्र फलब
लाद्व्याप्यतावच्छेदकप्रकारकं ज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह॥ लाघवादेवेति॥ व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्या
प्तिप्रकारकत्वस्य लघुत्वादित्यर्थः॥ नन्वस्तु तत्तावच्छेदकलाघवं तथापि पूर्वोक्तकल्पनालाघवमेव मीमांसकानां मूलयुक्तिर्भविष्यती
त्यत आह॥ किंचेति॥ न च गृह्यमाणेति॥ अत्र शानच्प्रत्ययेन वर्तमानताया अभिधानान्नकालांतरीयता दृशग्रहमादाय दोषः व्याप्तिप्र
कारकं ज्ञानमिति॥ स्वतंत्रकारणमित्यनेनान्वयीत्यस्य तद् इति॥ इत्थं च तत्पुरुषीयत्वं न निवेश्यते। चैत्रस्य व्याप्तिग्रहकाले तद्भूम्यमैत्रस्या

दिनकरी नुमित्यापत्तेरभावान्मैत्रस्यात्मनि स्वतंत्रहेतुभूतव्याप्ति[illegible]ज्ञानाभावादिति न गौरवमिति भावः ॥ ननु व्याप्तिप्रकारकपक्षधर्मताविषय अनुमान
कव्याप्तिप्रकारकज्ञानत्वेन वा हेतुता यत्र विशिष्टगमनाविरहेण हेतुताद्वयं तत्रापीत्यत आह ॥ वन्हिव्याप्येति ॥ अनुमितिः स्यादिति ॥ न्या
हेतुप्रकारता यनये तु व्याप्तिप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञान[illegible]त्वेन हेतुत्वस्य विवक्षितत्वात् ॥ न तादृशज्ञानान्नवा धूमो वन्हिव्याप्यो धू
निरूपित मवान्पर्वत इति ज्ञानादनुमित्यापत्तिस्तत्र व्याप्तिप्रकारतानिरूपितधूमप्रकारतायाः पर्वतविशेष्यतानिरूपितप्रकारतानात्मक
त्वादिति भावः ॥ ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पने गौरवं न्यायमते दूषणं भविष्यतीत्यत आह ॥ इत्थं चेति ॥ फलमुखगौरवस्ये
ति ॥ फलं कार्यकारणभावग्रहः ॥ तन्मुखं ॥ तदधीनं ॥ गौरवं ॥ गौरवज्ञानमित्यर्थः ॥ विशिष्टज्ञानत्वावच्छेदेन कारणत्वग्रहे वि
शिष्टज्ञानधर्मिगौरवनिश्चयो विरोधी वाच्यः ॥ तच्च गौरवं प्रमाणान्तरासिद्धं तत्तदनुमित्यव्यवहितपूर्ववृत्तित्वाश्रयकत्वमेव ॥ ता
दृशगौरवनिश्चयो विशिष्टज्ञानत्वेन कारणत्वनिश्चयाधीनः स्वघटकीभूततत्तदनुमित्यव्यवहितपूर्ववृत्तित्वाश्रयनिर्णयं वि
ना न संभवतीति कार्यकारणभावनिर्णयात्पूर्वं गौरवनिर्णयाभावान्न तादृशगौरवं दोषाय इति भावः ॥ मूले परामर्शस्य लक्षणा
नंतरं व्याप्तिनिरूपणे संगतिमुपोद्घातं निरूपयति ॥ व्याप्यो नामेति ॥ [illegible]ति ॥ घटत्वसमस्यर्थः ॥ अव्याप्तिप्रसंगादिति क
॥ अव्याप्त्यभिधानमिदं येनकेनचित्संबंधेन साध्यवत्वविवक्षणाभिप्रायेण ॥ यद्यच्च संबंधसामान्येन साध्यवत्वं विवक्षितं
तेनतदा धूमवानुवन्हेरित्यत्रापि व्याप्तिर्बोध्या ॥ अवृत्तित्वं नास्तीति ॥ विशिष्टसाध्यवत्तायानातिरिक्तत्वादिति भावः ॥ फलितार्थे

त्रे ७

२ २

श्रीगणेशायनमः ॥ ॥ अनुमितिमिति ॥ संगतिश्चात्र प्रसक्तेनोपजीव्योपजीवकभावो बोध्यः ॥ करणे निर्दिष्ट एव व्यापारे जिज्ञा
सोदयान्मूले पश्चान्निर्दिष्टमेव करणं प्रथमं दर्शयति ॥ व्याप्तिज्ञानमिति ॥ परामर्शो व्यापार इति ॥ ननु व्यापारत्वं जन्यत्वे सति तत्
जन्यजनकत्वं तच्च परामर्शे न संभवति ॥ वन्हिव्याप्यधूमवान्पर्वत इति परामर्शे व्याप्तिज्ञानजन्यत्वस्याभावान्महानसीय
वन्हिधूमव्याप्तिज्ञानस्य तदानीमभावेन व्यभिचारादत स्तदुपपादयति ॥ तथाहीत्यादिना ॥ पश्यतीति ॥ धूमदर्शनस्य व्याप्तिस्मरणोद्बो प
त्व धकविधया हेतु संपसर्थः ॥ यादृशविशेषणविशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञानं तादृशधूमदर्शनस्यैव व्याप्तिस्मृत्यु
द्बोधकत्वमित्यभिप्रायेण विशिष्यतन्मुक्तं ॥ एवंरूपं स्मरणमिति ॥ उद्बुद्धसंस्कारस्य पूर्वं सत्त्वादिति भावः ॥ स एव प व्याप्ति
रामर्श इति ॥ तथा च स्मरणात्मकव्याप्तिज्ञानस्य पूर्वं सत्त्वान्न व्यभिचार इति भावः ॥ न च तथापि यत्र व्याप्तिघटकपदार्थानां
को विसकलितं खलोपस्थिति मूले विशेष्यविशेषणमिति रीत्या परामर्शस्तत्र सर्वविशिष्टव्याप्तिज्ञानस्य व्यभिचारः दुरुद्धार
एवेति वाच्यं ॥ व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवेन विशिष्टस्य वैशिष्ट्यमिति रीत्या परामर्शस्यैवानुमितिहेतुत्वादित्य
भिप्रायात् ॥ स्मरणात्मकपरामर्शे व्यभिचारद्वयमपि न ॥ संस्कारसंबंधेन पूर्वं व्याप्तिज्ञानस्य सत्त्वात् ॥ अत्रेनव्याः ॥
व्याप्तिज्ञानस्य परामर्शे व्यापकतयानुमितिं प्रतिहेतुत्वमेव नास्ति ॥ कुतः करणत्वं ॥ अन्यथा कपालादेर्घटं प्रति द्रव्यत्वेन

व वे

इदमुपलक्षणं ॥ विशिष्टाभावमादायाव्याप्तिरिति बोध्यं ॥ ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्न प्रति
योगिताकत्वेन भावविशेषणान्नाव्याप्तिरित्यत आह ॥ गुणत्वेति ॥ अत्र हेतोरेकव्यक्तिसत्तानान्या
३ धिकरणयोरव्याप्तिरित्युक्तावपि नास्तु इतिभावः ॥ एतद्रूपवानेतद्रसादित्यादौ लक्षणसत्वात् संभवा
संभवादाह ॥ अव्याप्तीति ॥ इतिवाच्यमिति ॥ गुणत्वस्य वक्ष्यमाणप्रतियोगिवैयधिकरण्यावच्छिन्नद्रव्यत्वस
भाव मानाधिकरणे प्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरितिभावः ॥ परंपरया स्वाश्रयसमवायेन ॥ तथा
चोक्तपरंपरया यदवच्छेदकं तदन्यस्य जातित्वे सत्यान्नाव्याप्तिः इतिभावः ॥ तादृशधर्मावच्छिन्नाभावः उक्तपरंपरया रू
पत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाभावः । नास्तीत्यत्रापि पृथिव्या मित्यानुमज्यते ॥ मतांतरमाह ॥ साध्यादीति ॥ आदि
ना साधनपरिग्रहः ॥ व्याप्तिभेदादिति ॥ व्याप्तिज्ञानस्य कारणताभेदादित्यर्थः ॥ पूर्वोक्तरीत्या नियतहि तत्र साध्यतावच्छेदकता
क वच्छेदक धर्मिप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारकज्ञानत्वस्य हेतुत्वं नोचितं ॥ कारणतावच्छेदकगौरवात् ॥
न च पूर्वोक्तरीत्या तु जातिमानित्येवानुमितिस्यान्नतु जातिमानित्याकारिकेति वाच्यं ॥ पृथिवीत्वादिहेतु ह
के जातिमानित्येवानुमित्याकारो जातिमत्वानित्याकारस्तु तत्वकिंहेतुक इत्यदोषाद्रूपत्ववदितिश्चामस्वरसः सूचितः ॥ ल ३
रूपध्वंसत्ताससामानाधिकरणेति ॥ न च विशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसंबंधत्वे कथं तेन संबंधेन स
तासाधिकरणे गुणः समवायस्यतथात्वेतु द्रव्यत्वसाध्येविशिष्टसत्तायांव्यभिचारित्वात्तत्राव्याप्त्यभिधानमसंगतमिति वा
गतमि

च्यं ॥ साध्याभाववद्वृत्तितावच्छेदकहेतुतावच्छेदकत्वस्यैव व्यभिचारपदार्थतया रूपध्वंससमवायिसंबंधस्य हेतुतावच्छे
दकसंबंधत्वेपि विशिष्टसत्तायां हेतौ व्यभिचारित्वाभावात् ॥ नाव्याप्तिरिति ॥ न चैहेतुतावच्छेदकविशिष्टसत्तात्व
विशिष्टसत्तायाः अधिकरणत्वस्य गुणे सत्वादेवं लक्षणेपि कथमव्याप्तिपरिहारणेति वाच्यं ॥ हेतुतावच्छेदका
वच्छिन्ननिरूपिताधिकरणत्वस्य विवक्षितत्वाद्विशिष्टसत्तात्वस्य गुणवृत्तिनिष्ठाधिकरणतानिरूपिताधेयतावच्छेदकतया तदवच्छिन्ननिरूपिताधिकरणत्वस्य गुणे अभावादिति ॥ तथैव ॥ तद्वत्स्यैव ॥ तस्यैव वृत्तेरिति ॥ अधिक
भि रणभेदो नाभावभेदमभ्युपगमादितिभावः ॥ प्रतियोग्यधिकरणावृत्तित्वं । प्रतियोग्यधिकरणावृत्तिभिन्नत्वं ॥ विवक्षि
तत्वादिति ॥ प्रतियोगिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः ॥ नन्वेवं हेतुसमानाधिकरणेत्यस्य वैयर्थ्यं ॥ सत्तावा विरहाद्या
ञ्जातेरित्यादौ सत्ताद्यभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावादव्याप्तिरित्यत आह ॥ स्वप्रतियोग्यनधिकरणे
त्ति ॥ निष्कर्षेति ॥ प्रतियोगिव्यधिकरणाभावस्य इत्यस्य निष्कर्षदृष्ट्याभावः ॥ तथा च हेतुसमानाधिकरणवि
भा शेषणबलादेव तादृशप्रतियोगिवैयधिकरण्यलाभान्न तद्वैयर्थ्यमितिभावः ॥ सत्ताधिकरणत्वेपि विशि
ष्टसत्ताभावानप्रतियोगिव्यधिकरणः ॥ अभावांतरप्रतियोगितायाश्चानवच्छेदकमेव विशिष्टसत्वस्याति ना
व्याप्तिरितिभावः ॥ नक्षतिरिति ॥ नातिव्याप्तिः ॥ एवमग्रेपि ॥ ननु प्रतियोगितावच्छेदकसंबंधेनैव प्रतियो

ऽदिनक ग्यनधिकरणत्वमुच्यते तावतापि ज्ञानवान्सत्वादित्यादौ अनुमिप्रसंगादित आह ॥ इत्थंचेति ॥ साध्यतावछेदकसंबंधेन री
त्व प्रतियोग्यनधिकरणत्वविवक्षणेचेत्यर्थः ॥ वह्निविरहसत्वेपीति ॥ तथाच प्रतियोगितावछेदकसमवायेनप्रतियोगिव्यधिक
रणतादृशाभावप्रतियोगितावछेदकत्वेपि वन्हित्वस्यनाव्याप्तिः ॥ साध्यतावछेदकसंबंधावछिन्नत्वेनाग्रिमप्रतियोगि
ताविशेषणेनतु संबंधद्वयप्रवेशेनगौरवमितिभावः ॥ नक्षतिः नाव्याप्तिः ॥ समवायेनवन्ह्यभावस्यसाध्यतावछेदकसंयो
गेनप्रतियोग्यनधिकरणत्वेनाधिकरणवृत्तित्वाभावादितिभावः ॥ तत्सामान्यस्य प्रतियोगितावछेदकावछिन्नसामा
न्यस्य ॥ यत्किंचिदिति ॥ यत्किंचित्प्रतियोगितावछेदकं तदवछिन्नसामान्यस्य वेत्यर्थः ॥ पूर्वक्षणवृत्तित्ववि
शिष्टस्येति ॥ पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्यघटाभावादेर्योऽभावस्तदात्मक इत्यर्थः ॥ घटाभावाधिकर
णत्वेपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरक्षणावछेदेनसत्वादितिभावः ॥ पूर्वक्षणवृत्तित्व नच
स्य विशिष्टस्यघटाभावादेरभावस्याभावप्रतियोगीघटाभावादेरितिवाच्यं ॥ पूर्वक्षणवृत्तित्वविशिष्टस्य
घटाभावादेर्योऽभावस्तदभावस्य पूर्वक्षणवृत्तित्वविशिष्टघटाभावरूपस्यघटाभावानतिरेकित्वापात्तविशि ४
ष्टघटाभावप्रतियोगिनस्तस्य शुद्धघटाभावप्रतियोगित्वात् ॥ तथाच प्रतियोगिव्यधिकरणाभावाप्रसिध्या असं

नञ

धेयता

ति ॥ तथाचतन्निष्ठाधिकरणतानिरूपकतावछेदकस्यैवतन्निरूपितावछेदक ॥ तन्नियमेनविशिष्टसत्तात्वस्यगुणाधेयतान
वछेदकत्वान्नाव्याप्तिरितिभावः ॥ अथैवमप्युक्तलक्षणंभवतात्वितु अत्रलक्षणे दोषमाह ॥ नन्विति ॥ ननुकेवलान्वयित्वज्ञान
कालेपक्षताघटकसंशयाभावान्नैवानुमितिः ॥ तद्घटककालत्रयात्मकव्याप्तिज्ञानोदनुमितिर्भवत्येव ॥ अत आह ॥ किंचेति
॥ इत्यादाविसादिनासंयोगेनहेतुतायां गुणवान्घटादित्यादेः संग्रहः ॥ ननु स्वाधिकरणावृत्तिसाध्यवदन्योन्याभावकत्वंल
क्षणार्थः ॥ तथाचनेयमपि व्याप्तिरितिचेन्न ॥ वन्हिमान्धूमादित्यादौ धूमाधिकरणेवन्हिमदन्योन्याभावस्यकालि
व कसंबंधेनवृत्तेरव्याप्तेः ॥ साध्यताग्रहविरोधितानियामकसंबंधेनावृत्तित्वस्यावश्यंविवक्षणीयतया सत्ताभाव
वान्जातेरभावादित्यादावव्याप्तिः जात्यभावाधिकरणेसाध्यवत्ताग्रहविरोधितानियामकसमवायेनवृत्तेरप्रसिद्धेः ॥
नचसत्तावान्जातेरित्यादौ स्वाधिकरणेसाध्यव्याप्तिज्ञानंकारणं ॥ सत्ताभाववान्जात्यभावादित्यादौतु साध्यवदन्यत्वादिव्या
प्तिज्ञानंकारणमितिवाच्यं ॥ तथापि संयोगसंबंधावछिन्नघटाभावसाध्ये विवक्ष्यितया हेतौघटत्वलक्षणद्वयस्यव्या
प्तेः ॥ तत्रविषयितयाहेत्वधिकरणज्ञानसाध्यवत्ताग्रहविरोधित्वानियामकसंयोगेनतथाभूतेसंयोगेनघटाधिक त्वे
रणहेतुतावछेदकविषयितासंबंधवृत्तेरप्रसिद्धेः ॥ नन्वितिरिक्तोभयाभावमानाभावइत्यत आह ॥ एकसत्वेपीति ॥

संबंधेन

वेपि यथा संनिवेशेन वैय्यर्थ्यमिति बोध्यं ॥ साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे अव्याप्तिं शंकते ॥
नन्विति ॥ महाकालविभेदविशिष्टघटाभाववतीति ॥ अभावीय[redacted]क विशेषणताघटितसामानाधिकरण्यसंबंधेन म
हाकालभेदविशिष्टस्य घटस्याभाववदित्यर्थः ॥ महाकालभेदाभाववदिति ॥ अभावीयविशेषणतासंबंधेन महाकाल
भेदाभाववदित्यर्थः ॥ सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभ्यां यत्र विशेषणविशेष्योभयवत्वं त
त्रैव विशिष्टाधिकरणत्वायगमादिति भावः ॥ ननु महाकालमात्रवृत्तिविशेषणताविशेषेण साध्यतायां महाकाला
न्यत्वविशिष्टघटाभावोपि न प्रतियोगिव्यधिकरणः ॥ तत्र तेन संबंधेन महाकालान्यत्वविशिष्टघटाधिकरणाप्रसि
द्धेरत आह ॥ वस्तुतस्त्विति ॥ अत्र प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्यभावीयसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्षणकरणेपि कालो घटवानित्यादावतिव्याप्तिस्तदवस्थै
व ॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताया अप्रसिद्धेरतः प्रतियोगिताधर्मिकोभयाभावपर्यंतानुधावनं
समवायेन वन्ह्यभावप्रतियोगितायां वन्हित्वावच्छिन्नत्वसत्वात् संयोगेन घटाभावप्रतियोगितायां साध्यतावच्छेदक
संबंधावच्छिन्नत्वसत्वाद्वन्हिमान्धूमादित्यादौ अव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः ॥
गतं बंधा

संयोगेन घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्वादतिव्याप्तिवारणाय ॥ सामान्येति ॥ अप्रसिद्ध
मिति ॥ तथा चाव्याप्तिरिति भावः ॥ यदि कंबुग्रीवादिमान्नास्तीत्यादेः कंबुग्रीवादिमत्प्रतियोगिकाभाव एव विषयो न
तु कंबुग्रीवादिमत्वत्वप्रतियोगितावच्छेदकत्वमपीत्युच्यते तदा यत्किंचिद्घटत्वस्यपि कंबुग्रीवादिमान्नास्तीति वा
क्यस्य प्रामाण्यापत्तिरिति हृदि निधाय ॥ संक्षेपइति ॥ मूले पक्षतानिरूपणसंगतेरप्रदर्शनात्तां प्रदर्शयति ॥ पक्षत्व
त्तित्वभिसंधेरिति तथा च प्रकृतस्य परामर्शस्य घटकतया पक्षधर्मत्वमपि प्रकृतं तदुपपादकरूपोपोद्घातसंगत्याप
क्षतानिरूपणं व्याप्तिनिरूपणानंतरं पक्षतानिरूपणे तत्कार्यैकारित्वमेव संगतिरिति बोध्यं ॥ पक्षतालक्षण
स्यस्पष्टतया अनुक्तेः पक्षतालक्षणं स्वातंत्र्येण दर्शयन्मूलार्थमाह ॥ सिषाधयिषाविरहेति ॥ घनगर्जि
तेन मेघानुमितिस्थले अव्याप्त्यापत्त्या सिषाधयिषामात्रस्य पक्षतात्वं निषेधयति ॥ सिषाधयिषामात्रं नेति ॥
मेघानुमानात् ॥ मेघानुमितेः ॥ अत एव ॥ वक्ष्यमाणदूषणादेव ॥ सिषाधयिषाविरहस्य विशेषणस्य प्र
योजनमाह ॥ सिद्धौ सत्यामिति ॥ अतेति ॥ तत्रानुमितिनिर्वाहकपक्षतासंपत्त्यर्थमित्यर्थः ॥ तत्र सिषाधयि
षायां सत्यामसत्यामपीति ॥ सत्यामुभयाभावप्रयुक्तस्यासत्वा[redacted]प्रयुक्त[redacted]स्य, विशिष्टा
विशेष्याभावमात्र क

सिद्धौ सत्यामसत्यां चेति । तस्यां विशेषणाभावमात्रप्रयुक्तस्यासत्त्वात्तदुभयाभावप्रयुक्ताभावस्य विशिष्टाभावस्य सत्त्वादिति भावः

ऽत्वकरोऽभावसत्त्वादिति भावः ॥ सिद्धेः सत्त्वादिति ॥ सिद्धेः सत्त्वेन तदभावरूपपक्षतायाः अभावेनेति भावः ॥ सिषाधयिषाविरहविशि
६ ष्टस्य च सिद्धेरेककालावच्छेदेनैकाभावत्वं ॥ तेन सिषाधयिषाकालीनसिद्धेः कालिकसंबंधेन सिषाधयिषाविरहविशि
ष्टत्वेपि न क्षतिः ॥ परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यद्धर्मस्मि सामग्र्या तदा तस्या उत्तेजकत्वं वाच्यं ॥ न
चैतत्संभवतीत्याशंकते ॥ ननु यत्रेति ॥ परामर्शानन्तरं ॥ परामर्शात्सिद्धिद्वितीयक्षणे ॥ ततः ॥ सिध्यसत्त्वितृतीयक्षणे ॥ क्रमेण द्वितीय
अव्यवधानेन ॥ एवमन्यत्रापीति ॥ यत्र परामर्शसिषाधयिषासिद्धयः क्रमेण ॥ एवं सिषाधयिषासिद्धिपरामर्शाः ए
वं सिषाधयिषापरामर्शसिद्धयस्तत्रेत्यर्थः ॥ सिद्धिकालिपरामर्शकाले चेति ॥ सिद्धिपरामर्शोभयक्षणे इत्यर्थः ॥ क
थमिति ॥ किमर्थमित्यर्थः ॥ इति प्रत्यक्षमिति ॥ अनुमितीष्टसाधनताविषयकमिति शेषः ॥ प्रत्यक्षे सत्त्वे पूर्वमनु
धी मितीष्टसाधनतास्वीकारे इच्छासामग्र्याः प्रतिबंधात्प्रत्यक्षमेव न स्यादित्यादिति ॥ यादृशयादृशेत्यादि ॥ घटानु
मितिर्जायतामितीच्छासत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वे पर्वतो वह्निमानित्यनुमितिसत्त्वे पर्वतो वह्निमा
निति सिद्धिसत्त्वेपि तदिच्छाबलात्तादृशानुमित्यापत्तिरत उक्तं सिद्धिसत्त्वेपि ॥ इदं चोत्तेजकेच्छाव्यक्तिपरि ६
चायकेत्यर्थं ॥ उत्तेजकस्य तु तत्तद्व्यक्तित्वेनैव निवेशो ध्येयः ॥ तेन ॥ तत्तदिच्छायाः उत्तेजकत्वेन ॥ यत्किंचिदज्ञानमि

भवदिति भावः ॥ घटाभावात्मकतयेति ॥ अभावाधिकरणकाभावस्य अधिकरणानतिरिक्तत्वादिति भावः ॥ इत्या
द्याविशादिना अभावसाध्यकसद्धेतुमात्रपरिग्रहः ॥ स्वरूपसंबंधेनेति ॥ अभावीयविशेषणतेत्यर्थः ॥ पूर्व
क्षणवृत्तित्वविशिष्टस्याभावेति ॥ पूर्वक्षणवृत्तित्वविशिष्टं यत्स्वं घटाभावादि तदभावात्मके इत्यर्थः ॥ प्रा
चां मते द्रव्ये संयोगसामान्याभावानंगीकारादाह ॥ कपीति ॥ घटाभावस्य यत्किंचित्प्रतियोगितावच्छेदकघ
टत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणस्य संभवात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबंधनाव्या
प्तिः संभवतीति भावः ॥ घटत्वहेतुके यत्किंचित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं
नहेत्वधिकरणघटादेः संभवति उत्पत्तिकाले घटे गुणसामान्याभावसत्त्वात् ॥ अत आत्मेत्यनुधावनं ॥ तृतीयवि व
वक्षणानुसारेण समाधत्ते ॥ यादृशेति ॥ यादृश्याः प्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं
हेतुमतस्तादृश्याः प्रतियोगिताया अनाश्रयत्वमित्यर्थः ॥ विवक्षितत्वात् ॥ अप्रतियोगिपदेन विवक्षितत्वात् ॥ कपि
संयोगाभाववानात्मत्वादित्यादौ गुणसामान्याभावत्वावच्छिन्नप्रतियोगिताया एव यादृशप्रतियोगितापदेनोपादानं
शक्यत्वेन तदनवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्त्वान्नाव्याप्तिरिति भावः ॥ अत्र यद्धर्मविशिष्टानधिकर
णत्वं हेत्वधिकरणत्वं स्यात् धर्मभिन्नसाध्यतावच्छेदक[illegible]च्छिन्नसामानाधिकरण्यस्थले पार्निर्दिष्टस्य संभ

५

श्री

प्रत्यक्षातिरिक्तं ज्ञानं जायतामिति साध्यनुगतेच्छानंतु तत्तद्व्यक्तित्वेन ॥ ननु सकलेच्छानां तत्तद्व्यक्तित्वेन गौरवा
दिति ॥ सिषाधयिषाकाले पर्वतो वह्निमानिति सिद्धिसत्त्वे पर्वतो वह्निमानित्यनुमित्युत्पत्तेस्तादृशसिद्धेर्नतादृशानु
मितिं प्रति प्रतिबंधकत्वं स्यादत उक्तं सिषाधयिषाविरहकालीनेति ॥ विशिष्यवक्तव्येति ॥ पर्वतो वह्निर्वह्निमानित्याद्य
नुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबंधकता वक्तव्ये
त्यर्थः ॥ तत्प्रयोजनमाह ॥ तेनेति ॥ सिद्धेर्वैयधिकरण्येन सामानाधिकरण्येन सिद्धिव्यवच्छेदः ॥ सामानाधिक
रण्येनानुमितित्वं प्रतीति ॥ सामानाधिकरण्यमात्रेणानुमितिं प्रतीत्यर्थः ॥ अन्यथावच्छेदकावच्छेदेना
नुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेदाप्रतीतेः ॥ सिद्धिमात्रमिति ॥ पक्षविशेष्यकसाध्यप्रका
रकनिश्चयत्वेन विरोधित्वमित्यर्थः ॥ उपाध्यायास्तु ॥ सिषाधयिषाविरहविशिष्टस्य सिद्धिप्रत्यक्षसामग्र्यो
रन्यतरस्याभावः पक्षता तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकालेपि च नानुमित्यापत्तिरित्याहुः ॥
तदुपपादयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्षिप्रवेशे प्रत्यक्षसामग्रीकाले कथं नानुमितिरित्युत्कटशि
ष्यजिज्ञासानुत्पादार्थं प्रथमतः स्वसिद्धांतमाह ॥ इदं तु बोध्यमित्यादिना ॥ संशयोत्तरप्रत्यक्षं प्रति हेतुभूतस्य विशे

षदर्शनस्य सत्त्वादिति भावः ॥ एतादृशप्रत्यक्षसामग्रीपर्यंतानुधावनं च तद्विषये अनुमितिसामग्रीसंपत्तिप्रदर्शनार्थं
स्वातंत्र्येणानुमितिसामग्रीप्रदर्शने प्रयासापत्तेः ॥ स्वातंत्र्येणेति ॥ ननु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः ॥ [redacted] शाब्द
सिद्धौ सत्यां मनस्याम शाब्दं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिगोचरेच्छात्वेन तादृशेच्छाकाले
नु प्रत्यक्षसामग्रीकालेऽनुमित्युत्पादेन सामग्र्यामनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वस्यावश्यकतया एकरू
पेणोत्तेजकतासंभवात् ॥ एवमुभयत्र सिषाधयिषाविरहस्यनेकसंबंधेन विशेषणतं सिद्धौ समवायघटितसामाना
धिकरण्येन चक्षुःसंयोगादिसामग्र्यां तु स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटितसा
मानाधिकरण्येनैकरूपेण तयोः प्रतिबंधकतासंभवादित्याशयादिति दिक् ॥ ननु अनुमितिं प्रति प्रत्यक्ष
सामग्र्याः स्वातंत्र्येण प्रतिबंधकत्वे भिन्नविषयेपि प्रत्यक्षसामग्रीकालेनुमित्यनुपपत्तिः ॥ मन्मतेत्वनुमाना
तिरिक्तप्रकृतसाध्यसाधकमानत्वेन पक्षताकुक्षौ तस्याः प्रवेशेनोक्तापत्तेरनवकाशादत आह ॥ एवमिति
अनुमितिसामग्रीप्रतिबंधकेति ॥ तथा च भिन्नविषयकानुमितिसामग्र्यभावघटितप्रत्यक्षसामग्र्याः तत्रा
भावान्नोक्तस्थलेऽनुमित्यनुपपत्तिरिति भावः ॥ यद्वा ॥ अनुमितिसामग्रीप्रतिबंधिका ॥ अनुमितिसा

दिनकरी अ० मत्त्वेव प्रतिबंधिका । न तु भिन्नविषये प्रत्यक्षानुमितौ प्रतिबंधके इत्यर्थः ॥ तथा च प्रत्यक्षसामग्र्याः समानविषय
८ कानुमिति प्रत्येव प्रतिबंधकतया पूर्वोक्तस्यानुपपत्तिरिति भावः ॥ ॥ श्रीः ॥ ॥ हेत्वाभासानिति ॥ विजयलक्षणे
ककार्यकारित्वमत्र संगतिर्बोध्या ॥ ननु लक्षणात्मकसाधारणधर्मज्ञानं विना विशेषजिज्ञासानुदयाद्विभागोऽनि
त ष्प्रयोजक इत्यत लक्षणमाह ॥ तल्लक्षणेति । हेत्वाभासलक्षणमित्यर्थः ॥ उक्तलक्षणं ग्राहयति ॥ तथा
हीति ॥ यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं । तथा च वह्निमान्धूमादित्यत्र वह्न्यभावे अतिव्याप्तिः ॥ पर्वत
विशेष्यकवह्न्यभावप्रकारकनिर्णयत्वेन वह्न्यनुमितिप्रति प्रतिबंधकत्वेन वह्न्यभावविषयकत्वस्य प्रतिबंधक व
तावच्छेदककोटिप्रविष्टत्वात् ॥ न च स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधिकरणत्वं अनतिरिक्तवृत्तित्वं चा ।
अवच्छेदकत्वं तृतीयार्थः । वह्न्यभावविषयकत्वस्यावच्छेदककोटिप्रविष्टत्वेऽप्यवच्छेदकतापर्याप्त्यनधिकरण
त्वादतिरिक्तवृत्तित्वाच्च नातिव्याप्तिरिति वाच्यं गुरु अप्रामाण्यज्ञानानास्कंदितत्वस्याधिकस्य प्रतिबंधकताव
च्छेदककोटिप्रविष्टत्वात् ॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे दो वह्निमान्धूमादित्यादौ वह्न्यभा ८

२ ॥ पर्याप्तिनिवेशे असंभवापत्तेः ॥ २

नष्ट्य
ष्यस्य एतदुत्तरकालीनमित्यादि ॥ यत्किंचिज्ज्ञानस्य सर्वदा सिद्धत्वेन तद्रूपेणेच्छाविरहासत्त्वात् ॥ नानुमितिरिति ॥ नानु
मित्यापत्तिरित्यर्थः ॥ तदिच्छाया स्तद्व्यक्तित्वेनोत्तेजकत्वोपगमादिति भावः ॥ न च यत्किंचिज्ज्ञानं जायतामितीच्छा
काले सिद्धिकालेऽप्यनुमितिर्भवत्येवेति वाच्यं ॥ अनुमितिसामग्रीसत्त्वे आत्मादिविषयकयत्किंचिन्मानसादिसा
मग्री नियमेन यत्किंचिन्मानसाद्युत्पत्त्येव तदिच्छा घटविषयकसिद्धेस्तत्रानुमित्युत्पत्तौ इष्टापत्त्यसंभवात् ॥ नन्वनुमि
तित्वप्रकारकेच्छात्वेनानुगतरूपेणैवोत्तेजकत्वं वाच्यं ॥ तावतैव यत्किंचिज्ज्ञानं जायतामितीच्छावारणसंभवान्नतु
त्वं तद्व्यक्तित्वेनोत्तेजकत्वं ॥ क गौरवादित्यत आह ॥ वह्निव्याप्येति ॥ प्रत्यक्षातिरिक्तं ज्ञानमित्यस्य शाब्दसामग्र्य
सत्त्व इत्यादिः ॥ शाब्दसामग्रीसत्त्वे शाब्दबोधेनैवेच्छाविषयसिद्धिसंभवात् ॥ भवत्येवेत्यनुमितिरित्यनेन संबध्य नेत्यादिति
ते ॥ तथा चानुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वे तत्रानुमितिर्भवेत् ॥ तल्लिंगकत्वप्रवेशस्यावश्यकत्वमा
ह ॥ एवमित्यादिना ॥ नानुमितिरिति ॥ इच्छाया स्तद्व्यक्तित्वेनोत्तेजकतया तदिच्छाया अनुमित्युत्तेजक न
त्वादिति भावः ॥ इदं तु बोध्यं ॥ पर्वतो वह्निमानित्यनुमितिर्जायतामितीच्छानुगमे तदिच्छानां पर्वतत्वावच्छिन्नविशेष्यक
त्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेन रूपेणैवोत्तेजकत्वं

भा ॥ नयति ह्रदो वह्निमान्न वेति संशये वह्निमान् ह्रदो वह्न्यभाववानित्याहार्यनिश्चये ऽप्रामाण्यज्ञाना-
स्कंदितत्वादेतादृशनिश्चये च वह्न्यभाववद्विशिष्टह्रदविषयकत्वस्य सत्वादसंभव इति चेन्न॥ ज्ञानस्येत्यत्र
ज्ञानपदस्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयपरतया तादृशनिश्चयनिष्ठ या इदृशविशिष्ट-
विषयकत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यर्थस्ताभावादित्यादिकं॥ सत्प्रतिपक्षस्या-
ल नित्यदोषत्वादाशंकते॥ न च यत्रेति॥ विशिष्टस्याप्रसिद्धत्वादिति॥ पाषाणमयत्वे वह्न्यभावव्या-
प्यत्वाभावादिति भावः॥ इष्टापत्तेरिति॥ सद्धेतूनां प्रतिपक्षमध्येऽपि न दुष्टत्वमिति भावः॥ अन्यथा
प्रतिबंधकीभूतभ्रमविषयस्यापि दोषत्वे॥ अनित्यदोषत्वापत्तेरिति॥ पक्षे साध्याभाववत्ता-
मदशायां सद्धेतावपि दोषत्वापत्तेरित्यर्थः॥ इदमनयाहृशविशिष्टविषयकत्वेन ज्ञानस्यानु-
मितिप्रतिबंधकत्वं तादृशविशिष्टस्य दोषत्वे च॥ हेत्वादिकमप्यादिना॥ साध्याभावविशि-
ष्टपक्षपरिग्रहः॥ यादृशविशिष्टपदेन व्यभिचारत्वादिविशिष्टव्यभिचारत्वादिकमादाय लक्षणं न संभवति। [redacted]

~~रत्वादिकमादाय लक्षणं न संभवति~~॥ व्यभिचारविषयकत्वस्य प्रतिबंधकताश्रये व्यभिचार इति ज्ञाने वृत्तित्वेनातिरिक्तवृत्तित्वा-
त्॥ किंतु व्यभिचारादिविशिष्टहेत्वादिकमादायैवेति व्यभिचारादिविशिष्टहेत्वादिकमेव दोष इति भावः॥ ननु व्य-
भिचारादिविशिष्टस्य हेतोर्दोषत्वे तद्वत्त्वस्य हेतावभावाद्धेतोर्दुष्टत्वव्यवहारो न स्यात्॥ न च तादात्म्येन तद्वत्त्वं
विवक्षणीयमिति वाच्यं॥ तथा सति वन्ह्यभावविशिष्टह्रदादेस्तादात्म्येन धूमेऽभावे न ह्रदपक्षकधूमस्य दुष्ट-
त्वं न स्यादित्यत आह॥ तद्वत्त्वं चेति॥ न च वह्निव्यभिचारविशिष्टद्रव्यत्वादेर्धूमेऽपि सत्वादतिव्याप्तिरिति वाच्यं
यादृशविशिष्टविषयकज्ञानत्वेन यद्धेतुकानुमितिप्रतिबंधकत्वं तादृशविशिष्टाश्रयतद्धेतुत्वस्य वदु-
ष्टत्वादिति॥ सत्प्रतिपक्षत्वादेरनित्यदोषत्ववादिनां मतमाह॥ परत्विति॥ ननु वन्ह्यभावादिव्याप्तेर्यसदनो-
पादात्तादात्म्यत्वेपि तस्याः धूमावृत्तितया न धूमस्य दुष्टत्वं स्यादत आह॥ तद्वत्त्वं चेति॥ ज्ञानेति॥ एकज्ञानवि-
षयत्वेन तद्वत्त्वमित्यर्थः॥ तद्वत्त्वस्य साध्याभाववत्त्वस्य॥ तत्र॥ बाधकाले धूमादिसद्धेतावित्यर्थः॥ अत्र प्रति-
परामर्शकालीने धूमादिसद्धेतौ तत्कल्पनात्॥ ननु सद्धेतावपि बाधितेति व्यवहारेण संबधत्तकल्पनं ज्ञा-

आह

दिनकरी॰ अनस्यभविष्यतीयर्थं ॥ तत्र इति ॥ बाधभ्रमकालीने सधेता विसर्थः ॥ प्रसुतायं न बाधितः ॥ पुरुषस्तु भ्रांतद्रखेवव्य नुमान॰

१० वहारादिति भावः ॥ तादृशव्यवहाव्यवहारयोः स्वानुभवमात्रसाक्षिकत्वमाहुरियस्वरसो बीजं ॥ यथाश्रुत

विरोधित्वयोगबीजमाहु ॥ तेनेत्यादिना ॥ ननु तद्धेतुक तत्साध्यकानुमितिं प्रति तद्धेतौ तत्साध्यव्यभिचारग्र

हाभावो हेतुर्वाच्य स्तत्राह ॥ तदभावेति ॥ नक्षतिः ॥ नाव्याप्तिः ॥ ननु अत्र लक्षणे ऽवच्छेदकत्वं न स्वरूपसंबंधवि

शेषः पूर्वोक्तदोषादि यन्नतिरिक्त वृत्तित्वमवनिवेशनीयं तथाच धूमवान्वन्हेरित्यादौ प्रमेयत्वविशिष्टव्यभि

द्विषयक चारे ऽतिव्याप्तिः स्ते [illegible] तस्य प्रतिबंधकतानतिरिक्त वृत्तित्वादत आह ॥ संक्षेपादि ॥ प्रकृतानुमितिप्रति

त बंधकतावच्छेदकांतराघटितत्वेनानुमितिविरोधितावच्छेदके विशेषणीयं प्रमेयत्वविशिष्टव्यभि

चारश्च प्रकृतानुमितिप्रतिबंधकतावच्छेदकीभूतो यो व्यभिचारस्तद्घटित एवेति नत्रोति प्रसंगइ न १०

ति दिक् ॥ नन्वत्रानुमितितत्करणज्ञानान्यतरप्रतिबंधकत्वं अन्यतरनिष्ठप्रतिबध्यतानिरूपकत्व

तद घटितं यदि पर्वतो वन्हिमान्धूमादित्यादौ वन्ह्यभावविशिष्टह्रदस्यापि दोषत्वाप्रसंगः ॥ तस्य पर्वतो वन्हि

वविशिष्टह्रदादावव्याप्त्यापत्तेः ॥ प्रतिबंधकताभाववतिह्रदइत्येतादृशज्ञाने वन्ह्यभावविशिष्टह्रदविषयकत्वस्य सत्वात् ।

विशिष्टह्रदस्य केवलह्रदानतिरेकादत आह ॥ यद्विषयकत्वं चेति ॥ एतद्विवक्षणप्रयोजनमाह ॥ तेनेति ॥ बाधभ्र

मस्य बाधभ्रमसाधारणस्य पर्वतविशेष्यकवन्ह्यभावप्रकारकत्वादिरित्यर्थः ॥ अनुमितिविरोधित्वेति ॥ अनुमिति

विरोधितावच्छेदकत्वेपिन क्षतिः ॥ न वन्ह्यभावादावतिव्याप्तिः ॥ इतरथा तु वन्ह्यभावविषयकत्वस्य पर्वतविशे

ष्यकवन्ह्यभावप्रकारकत्वरूपानुमितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात् तत्रातिव्याप्तिः स्यादिति भावः

यादृशविशिष्टेति विवक्षितेतु तत्र नातिव्याप्तिरित्याह ॥ तत्रेत्यादिना ॥ नच वन्ह्यभावविशिष्टपर्वतस्याप्रसि

द्धत्वेपि यादृशविशिष्टपदेन वन्ह्यभाववत्त्वविशिष्टवन्ह्यभावमुपादाय तत्रातिव्याप्तिरिति वाच्यं ॥ यादृशविशिष्टेति

विवक्षणे ऽनतिरिक्त वृत्तित्वरूपस्यावच्छेदकत्वस्य लक्षणे निवेशने यत्तया वन्ह्यभावविषयकत्वस्य प्रतिबंधकताभाववतित्व

ह्निभाव इति ज्ञाने वृत्ते स्तत्रातिव्याप्तेरभावात् ॥ नचैवं पूर्वोक्तरीत्या वन्ह्यभावविशिष्टह्रदादावव्याप्तिरिति वाच्यं ॥ यादृशविशि

ष्टवि षयकत्वेन तस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात्तत्वेमि यस्य तद्रूपत्वमित्यर्थकत्वात् ह्रद इति ज्ञाने च वन्ह्य

भा वावच्छिन्नविषयकत्वाभावात् ॥ अथात्रानतिरिक्त वृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्षणे ऽनुमितिप्रतिबंधकत्वा

भावः ॥ प्रतिबध्यतेति ॥ व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिबध्यत इत्यर्थः ॥ एवं च साधारणोऽनुपसंहारिणो व्याप्ति
११ ज्ञानप्रतिबंधकरूपदूषकताबीजैक्येनैकहेत्वाभासत्वमुपपद्यते ॥ साधारणेनाव्यभिचारग्रहस्य साधारणेन
सामानाधिकरण्यस्यानुपसंहारिणा च व्यतिरेकव्याप्तिज्ञानस्य प्रतिबंधादिति भावः ॥ प्राचीनमतमाह ॥
अन्ये त्विति ॥ पक्षे साध्यसंदेहदशायामेव असाधारणस्य हेत्वाभासता न तु निश्चयदशायां तदा पक्षस्यैव
सपक्षत्वेन निश्चितसाध्यवद्वृत्तित्वाभावादसिद्धदोषत्वं तस्येत्यत आह ॥ दूषकं चेति ॥ असाधारण्यघटक
सपक्षत्वस्य निश्चयघटितत्वेनेत्यर्थः ॥ तत्र निश्चितसाध्यवतिपक्षे ॥ साधारणादित्रयाणामेकहेत्वाभासत्वा
प नुपपत्तिर्वेदत्ती। येनेनास्वरसः सूचितः ॥ व्यतिरेकव्याप्तिग्रहप्रतिबंधेति ॥ केवलान्वयिसाध्यके च अन्वय
व्याप्तिज्ञानादेवानुमितिरिति भावः ॥ नन्वेवं साध्याभावसाधकात् सत्प्रतिपक्षाद्विरुद्धस्य भेदो न स्यादत आ ११
ह ॥ सत्प्रतिपक्ष इति ॥ प्रतिहेतुः ॥ प्रतिकूलो द्वितीयो हेतुः ॥ इति शेषः ॥ इयमनयोर्भेदः ॥ ननु दूषकतावी ति
ननु दूषकताबीजैक्येपि हेतुभेदे सत्प्रतिपक्षो हेत्वैक्ये विरुद्धरूपहेत्वाभास इत्युच्यते ॥ यदा तत्रान्वयिना हेतुत

रेण विरोधस्तत्र सत्प्रतिपक्षो यत्र तु व्यतिरेकिणा तत्र हेत्वाभासांतरं स्यात् अतो भेदकांतरमप्याह ॥ साध्याभावेति ॥ वस्तु ति
गत्या साध्याभावसाधके हेतावेव न तु साध्यसाधकप्रतिस्थापनाबुद्धि[illegible] प्रतिभ्रमरूपा शक्तिः स च कत्वं
असाधारणस्य न त्वेवं सत्प्रतिपक्षस्येति भावः ॥ साध्याभावव्याप्येति ॥ एवं साध्यवदन्यत्वव्याप्यघातपक्षः
पक्षनिष्ठौ साध्याभावसाध्यवदन्यत्वव्याप्यावपि बोध्यौ ॥ अन्यतमत्वादिना अनुगमान्न विभागव्या
घातः ॥ सत्प्रतिपक्षे व्यवहारोपयिकमन्येषां लक्षणमाह ॥ अगृहीतेति ॥ नियतव्याप्यशब्दत्ववत्ताज्ञानत
न्यकालीनानियतव्याप्यरूपकत्व[illegible] परामर्शे सत्यपि सत्प्रतिपक्षव्यवहाराभावात् कालीनांतं विशेषणं ॥
गृहीताप्रामाण्यकनियतव्याप्यवत्ताज्ञानकालीनानियत[illegible] व्याप्यरूपकत्वपरामर्शे सत्यपि तद्व ल
व्यवहाराभावादगृहीताप्रामाण्यकेति प्रथमोपस्थितिविशेषणं ॥ तादृशकालीनानियतव्याप्यवत्तापरामर्शे सत्यपि त
त्रऽप्रामाण्यग्रहकाले तथा व्यवहाराभावात् अगृहीताप्रामाण्यकत्वं द्वितीयोपस्थितिविशेषणं ॥ व्यवहा
रमात्रोपयोगिना निरुक्तरूपस्य प्रकृतानुपयोगः ॥ उपस्थितिघटितस्योक्तरूपस्य स्वरूपं सतत एको क्तस

दिनकरी भासतायां अप्रयोजकत्वादिस्वरसं सूचयन्नन्यद् इति ॥ सत्प्रतिपक्षस्य दूषकताबीजं प्रदर्शयति ॥ अत्रेत्यादिना ॥ सत्प्रतिपक्ष
१२ स्य संशयजनकत्वं दूषकताबीजं न त्वनुमितिप्रतिबंधकत्वं ॥ तदभाववद्व्याप्यवत्ताज्ञानस्यानुमितिप्रतिबंधकत्वमा
नाभावादिति तल्लकोशकारमतं दूषयितुमुपन्यस्यति ॥ अत्र केचिदित्यादिना ॥ अनुमितिर्भवत्येवेति ॥ सत्प्रतिपक्ष अनुमान
भावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वे मानाभावः ॥ तत्तदभावानुमितिसामग्रीभ्यामेव तत्तदभावकोटिक संशयानुमि
त्युपपत्तौ संशयानुमितिं प्रति उभयव्याप्यवत्तानिश्चयत्वेनातिरिक्तहेतुताकल्पनप्रयुक्तगौरवाभावाच्चेति भावः ॥ अनुमितिप्रतितद
भयभासकसत्वे उभयभानं तदा पित्तादिदोषसत्वेऽपि ॥ पीतत्वशुक्लत्वोभयस्मृतावुभयोर्भानापत्तिरित्यत आह ॥ फलबलेनेति ॥ ननु यद्य
वत्त्र पीतत्वसाक्षात्कारस्यैवानुभाविकतया ... त्वग्रहेऽपि तद्रूपदोषस्य प्रतिबंधकत्वं कल्प्यते वापीतत्वसाक्षात्कारस्या
मग्र्या अधिकबलवत्वं ॥ एवं दूरत्वदोषसत्वेऽपि स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात्तत्सामग्र्याः समबलत्व
मेव कल्प्यत इति भावः ॥ ज्ञानमात्रे ॥ तादृशज्ञानत्वावच्छिन्ने ॥ विशेष ॥ दोषविशेषाजन्ये ॥ गौरवादिति ॥ का
र्यकारणद्वयकल्पने गौरवादिति भावः ॥ कथमनुमितिरिति ॥ अनुमितेरपि तत्प्रतिबध्यतावच्छेदकाक्रांतत्वादिति भावः
कथं तर्हि उभयव्याप्यवत्तानिश्चयात् सांशयिकः संशयात्मा ज्ञानं क्वचन भवत्येव ॥ यावद्या ... व्यवत्तानिश्चये प्रामाण्यत १२
ग्रहेत इत्याह ॥ यत्र चेति ॥ आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः ॥ साध्याप्रसि

माव [illegible] इदं वन्हिमानिति समूहालंबनात्मकप्रकृतानुमि
तिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधतावच्छेदकत्वात् ॥ यद्विचता(?) तादृशान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपकत्वघटितं तदा तादृशान्यत
रत्वस्य कस्यचित्प्रतिबध्यतानवच्छेदकतया संभवः ॥ तादृशान्यतरत्वव्यापकप्रतिबध्यतानिवेशश्च व्यभिचारादौ बाधादौ चाव्याप्तिः ॥
व्यभिचारादेरनुमित्यविरोधितया बाधादेश्च व्याप्तिज्ञानाविरोधितया तत्प्रतिबध्यतायास्तथाविधान्यतरत्वाव्यापकत्वात् ॥ किंचैतद्धर्माव
च्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नहेतुकानुमितितत्करणान्यतरविरोधित्वं लक्षणे निवेशनीयं ॥ अन्यथा पर्वतो वन्हि
मान्धूमादित्यादौ पर्वतादेः कांचनमयत्वाभावो हेत्वाभासः स्यात् ॥ एवं च निर्वन्हिः पर्वतो वन्हिमान्निर्वन्हिर्वन्हिमानित्यादौ न कोऽपि
हेत्वाभासः स्यात्तादृशानुमितेरप्रसिद्धेरत आह ॥ यादृशसाध्येति ॥ संभवेति ॥ वायुर्गंधवान्स्नेहादित्यादौ सर्वहेत्वाभाससंभवादि
तिभावः ॥ हेत्वाभासलक्षणमुक्त्वा अग्रे वक्ष्यमाणेषु अनेकांतिकेषु लक्षणेषु कंचिद्दोषं निधाय स्वयमनैकांतिकादीनां ल
क्षणान्याह ॥ एवमिति ॥ साधारणादीत्यादिना असाधारणानुपसंहारिणोः परिग्रहः ॥ नन्वेतस्यानुमि~~[illegible]~~
तितत्करणज्ञानान्यतरविरोधित्वाविषयत्वात्कथं हेत्वाभासत्वमित्यतो दूषकताबीजमाह ॥ तेनचेति ॥ एवम
ग्रेऽपि ॥ निर्यतेति ॥ व्याप्तिघटकं व्यभिचारो [illegible] व्यभिचार ... ज्ञानस्य प्रतिबंधकत्वादिति

कतदभावनिश्चयः अनाहार्याप्रामाण्यज्ञानानास्कंदिततादृशलौकिकतदभावनिश्चयः बाधबुध्युत्तरक्षणे लौकिकसंनिकर्ष
जन्यविशिष्टबुद्धेः अनुभविकत्वादाह ॥ लौकिकसंनिकर्षाजन्येति ॥ नचैवं तदिंद्रियजन्यलौकिकबाधनि
श्चयोत्तरं तदिंद्रियजन्यलौकिकविशिष्टबुध्यापत्तेरिति ॥ अलौकिकप्रतिबध्यतावछेदककोटावनि
वेश्यतदिंद्रियजन्यतद्विशिष्टबुद्धौ तदिंद्रियजन्यलौकिकतदभावनिश्चयत्वेन प्रतिबंधकत्वोपगमात् ॥
तदिंद्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं तदिंद्रियजन्यलौकिकतद्विशिष्टबुध्युदयात् ॥ प्रति
बंधकतावछेदककोटौ लौकिकत्वस्य निवेशः ॥ नचालौकिकतदिंद्रियजन्याभावप्रमास्थलेतदधिकरणे प्रतियोगिनोऽ
सत्वादेव न तद्विशिष्टलौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबंधकभावेनेतिवाच्यं ॥ यत्रप्रतियोग्यधि
करण एव संनिकृष्टाधिकरणांतरे वृत्तेरभावस्य लौकिकप्रत्यक्षात्मिकारोपो दोषजनितः तदुत्तरं तदधिकरणे प्रति
योगिनो लौकिकप्रत्यक्षापादनात् ॥ तत्राभावलौकिकप्रत्यक्षजनकस्य दोषस्य प्रतिबंधकत्वादेवनेयमापत्तिः ॥ अ
न्यथाऽभावारोपोत्तरक्षणे प्रतियोगिप्रत्यक्षापत्तेरिति तु ॥ यत्र विनश्यदवस्थदोषेणाभावलौकिकप्रत्यक्षा

त्मकारोपः तदुत्तरं प्रतियोगिप्रत्यक्षापादनात् ॥ यत्राभावलौकिकप्रमासमकालं तद्वितीयक्षणे वा तदधिकरणे
प्रतियोगिप्रकारकानुभूयमानारोपजनकदोषसमवधाने तत्राभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्य
वारणा क्षात्मकारोपोपपादनीयेंद्रियभेदेन तथाविधप्रतिवध्य[redacted] प्रतिबंधकत्वोपगमात् ॥ शंखो न पीतः शंखो नार
ग इति निश्चये पित्तमंडूकवसांजनादिदोषवशाच्छंखः पीतः अयमुरग इत्यारोपोदयात्तत्र व्यभिचारवार
णाया[redacted]ह ॥ दोषविशेषेति ॥ दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैव बाधाप्रतिबध्यत्वापत्तिवारणाय वि
शेषेति ॥ तथाच पित्तमंडूकवसांजनादिदोषान्यविशेष्यापादायतदजन्यत्वं प्रतिबध्यतावछेदककोटौ नि
वेशनीयमिति भावः ॥ नच पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्यर्थः ॥ शंखः पीत इति भ्रमे शंखवृत्तेरनुभू
यमानस्यैव पीत[redacted]द्रव्यपीतिम्न आरोपोपगमेन तदंशे लौकिकत्वादलौकिकत्वस्य प्रतिबध्यतावछेद
कानिवेशादेव तत्र व्यभिचारवारणार्थमितिवाच्यं ॥ पीतद्रव्यस्यांतरावस्थानदशायामपि तत्पीतिम्नः शंखवा

दिनकरी दोषप्रत्यक्षोदयेन स्मर्यमाणारोपस्यैव तत्र नवीनैः स्वीकारात् तदंशे तस्यालौकिकत्वात् ॥ तथा सति शंखः पीत इति अनुमान
१४ प्रत्यक्षोत्तरं पीतं साक्षात्करोमीति साक्षात्कारित्वग्रहानुपपत्तिः तद्व्यंजकलौकिकविषयतायास्तत्राभावा
दिति नु ॥ लौकिकविषयताया इव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वादन्यथायमु
गइति स्मर्यमाणारोपसाक्षात्कारित्वग्रहानुपपत्तेः ॥ शंखो न पीत इत्यादितदिंद्रियजन्यबाधबुद्धौ सत्य
दि पित्तादिदोषवशान्नेंद्रियजन्यः पीत इत्यारोपोप्यनुभवसिद्धस्तदा पूर्वोक्तेंद्रियभेदभिन्नप्रतिबंधकाभावेपि
दोषविशेषाजन्यत्वं प्रतिबध्यतावच्छेदके निवेशनीयमिति भावः ॥ ननु बाधप्रतिबध्यतावच्छेदककोटौ
लौकिकान्यत्वस्य निवेशे बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यत्वसंशयापत्तिरिति चेन्न ॥ भूत
लं घटवदित्याद्याकारकलौकिकप्रत्यक्षासत्तिकाले स्वातंत्र्येण कथंचिदुपस्थितस्य घटाभावादेर्भूतलप्रका १४
रतया भानवारणाय समानधर्मितावच्छेदकक तत्कोटिलौकिकप्रत्यक्षसामग्र्या अपि विपरीतकोटिभान

ध्यादीनामाधिक्यं निराकरोति ॥ साध्याप्रसिध्यादय इति ॥ आदिना साधनपरिग्रहः ॥ केचिन्मतमाह ॥ एवं वह्नि
मानित्यादिना ॥ वदंतीत्य[illegible]ना नास्वरसः तद्बीजं तु नीलधूमव्याप्तिसत्वात्कथं व्याप्यत्वासिद्धिः ॥ न च तत्र व्या
प्तिसत्वेपि नीलधूमत्वस्य अनवच्छेदकत्वेन तदवच्छिन्नव्याप्यत्वासिद्धिरेवेति वाच्यं ॥ अतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य म
नीलधूमत्वेपि सत्वात् स्वरूपसंबंधरूपावच्छेदकत्वाभावाद्व्याप्यत्वासिद्धिरित्यपि न ॥ तथा सति पृथुमान्वह्निमा[illegible]त्या त रू
दोषेपि व्याप्यत्वासिद्ध्यापत्तेः ॥ साध्यपक्षयोगोवाहिज्ञाने लघुत्वेन साध्यादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात् ॥ अस्तु वा
नीलधूमत्वादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात् तदवच्छेदेन व्याप्यभावरूपव्याप्यत्वासिद्धिः ॥ ननु तस्या हेत्वाभा
सत्वं ॥ अनुमितिकारणीभूतव्याप्तिज्ञानाविरोधित्वात् ॥ न च वह्निमदन्यावृत्तित्वप्रमेयवानिति प्रमेयत्वसामाना
धिकरण्येन व्याप्त्यवगाहिज्ञानादनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव कारणतया तद्विरो
धित्वान्नीलत्वव्याप्यत्वासिद्धेर्हेत्वाभासत्वमिति वाच्यं ॥ तावतापि न निरुक्तवृत्तित्वरूपावच्छेदकत्वज्ञानस्य कारणत्वेपि तत्स्वरूप
रू संबंधरूपावच्छेदकत्वाभावावगाहिस्य व्याप्त्यभावानवगाहितया अविरोधात् ॥ तस्माद्व्यर्थविशेषणत्वेन व्याप्यत्वासिद्धि
हेत्वाभासः पुरुषे साधिकेन निगृह्यते ॥ साध्याभाववदवृत्तित्वादिना साध्यवदन्यत्वपक्षसत्वसाध्यादेरपरिग्रहः ॥ तत्र्श्मि

गात्॥ पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोनुमितिप्रतिबंधकस्तदभावः कारणं मतस्तद्दशाप्रमात्व
मेवबाध इति प्राचीनमतं दूषयति॥ एवमिति॥ प्रमात्वज्ञानमिति॥ प्रमात्वनिश्चयोपि॥ मानाभावादिति॥
ग्राह्याभावानवगाहिनः स्तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः॥ ननु पक्षे साध्याभावज्ञानेपि तत्रा
प्रामाण्यज्ञानकाले नुमितेरुदयान्न साध्याभावज्ञानं प्रतिबंधकं॥ अस्मन्मते तु तदा साध्याभावप्रमात्वनि
श्चयाभावादेवानुमित्युत्पत्तिरत आह॥ गौरवादिति॥ तथाच तत्रानुमितिनिर्वाहाय संशयनिश्चयसाधा
रणाप्रामाण्यज्ञानाभाव एव प्रतिबंधकतावच्छेदककोटौ निवेश्यते न तु पक्षविशेष्यकसाध्याभावज्ञानप्र
मात्वनिश्चयत्वेन प्रतिबंधकत्वं गौरवादित्यर्थः॥ यत्र पक्षे साध्याभावज्ञानमस्ति न तु तत्र प्रामाण्यज्ञानं न
वा प्रामाण्यज्ञानं तत्रानुमितिर्भवत्येवेति भावः॥ साध्याभाववत्पक्षघटितप्रमात्वे विपर्ययत्वेनानुमितिप्रति क
बंधकतानतिरिक्तवृत्तित्वसत्त्वाच्च तस्याभासत्वं दुर्वारमित्यत आह॥ प्रमेयत्वविशिष्टव्यभिचारादेरिव तादृ
शविशिष्टांतरघटितत्वेनाभासत्वायोगादिति॥ ननु गृहीताप्रामाण्यकसाध्याभावनिश्चयस्य प्रतिबंधकत्वे प्रथ

मोपस्थितप्रमात्वनिश्चय एव तथास्यादत आह॥ अन्यथेति॥ सत्प्रतिपक्षादावित्यादिना सिध्यादिपरिग्रहः॥ प्रतिबंध
कत्वापत्तेरित्यस्यानुमित्सादावित्यादि॥ साध्याभावज्ञानप्रमात्वज्ञानेऽनुमितिप्रतिबंधकस्तदभावेनुमेत्यन्वयव्यतिरे
काभ्यां प्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत आह॥ किंत्विति॥ क्वचिदप्युच्यते इति॥ तथाचानुमितितत्करण
ज्ञानान्यतरप्रतिसाक्षात्प्रतिबंधकीभूतज्ञानविषयत्वाभावान्न साध्याभावप्रमात्वं हेत्वाभास इति भावः॥ व्यभिचारज्ञा
नादेरित्यादिना सिद्धिज्ञानपरिग्रहः॥ भेदादिति॥ तथाच बाधस्थले सिद्धिव्यभिचारान्यतरनियमेन बाधज्ञान
स्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासांतरत्वमिति भावः॥ न च हेतुमान् पक्षः साध्याभाववान्नित्या
कारक एव बाधग्रहः॥ कुतो न भवति सामग्रीसत्त्वात्तथाच व्यभिचारज्ञानात्मकैव बाधबुद्धिरिति वाच्यं॥ परामर्शात्मका
व्यभिचारज्ञानरूपप्रतिबंधकसत्त्वेन बाधबुद्धेर्व्यभिचारविषयकत्वासंभवात्॥ एकदेतोव्यभिचाराव्यभिचारविषय
केकनिश्चयासंभवाच्च॥ नन्वयोगोलकपक्षकधूमसाध्यकवन्हिहेतुकबाधे लौकिकप्रत्यक्षवद्व्यभिचारलौकिक
प्रत्यक्षमपि व्याप्तिनिश्चये सत्यपि भविष्यतीत्यत आह॥ किंचेति॥ अकिंचित्कर इति॥ व्यभिचारज्ञानं हि अनुमितौ न सा चि

दिनकरी क्षाप्रतिबंधकं किंतुपरामर्शप्रतिबंधद्वारा ॥ तथाचपरामर्शोत्तरकालीनव्यभिचारज्ञानंभकिंचित्करमितितत्र अनुमान
बाधबुद्धिरेवप्रतिबंधकेतिभावः ॥ व्यभिचाराद्यसंकीर्णमपिबाधंप्रदर्शयति ॥ एवमित्यादिना ॥ बाधस्यैवे
१६ ति ॥ तत्रपक्षेहेतुसत्वेनस्वरूपासिद्धिः प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्यव्यभिचारस्यचा
भावादितिभावः ॥ बाधतद्व्याप्यभिन्नायेहेत्वाभासास्तद्व्याप्या अपितन्मध्यएवांतर्भवंतीतिपा[illegible]ः ॥ बाधः
साध्याभावविशिष्टपक्षादिः ॥ तद्व्याप्यः सत्प्रतिपक्षः स्वरूपासिद्धिः व्यभिचारविरुद्धासिद्धाः तद्व्याप्यानांत
त्रैवांतर्भावइत्यर्थः ॥ व्यभिचारादेरिव व्यभिचारादिव्याप्यस्यापि व्याप्तिग्रहप्रतिबंधक ज्ञानविषयत्वेन
न पंचहेत्वाभासानंतर्गतत्वेनस्य अतिरिक्तहेत्वाभासत्वंस्यादित्यर्थः ॥ नप्रतिबंधकइति ॥ साध्याभाव
व्याप्यवत्ताज्ञानस्यसाध्यवत्ताज्ञानविरोधित्वेमानाभावादितिभावः ॥ दूषकताबीजस्यभिन्नतयेति ॥ १६
साधारणस्याव्यभिचारज्ञानेविरुद्धस्यसामानाधिकरण्यग्रहेप्रतिबंधकत्वादितिभावः ॥ असाधारण्य

२ हेत्वाभासत्वंनस्यादतआह ॥ तद्विरोधितयेति ॥ अनुमितिकारणीभूतसाध्यसंसर्गज्ञानविरोधितयेत्यर्थः ॥ २

प्रतिबंधकत्वमवश्यं अंगीकरणीयं ॥ तथाचबाधनिश्चयोत्तरमपिनापत्तिर्लौकिक[illegible]सन्निकर्षजन्यसंशय
स्यतत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायाः सत्वेनविपरीतकोटिभानासंभवात् ॥ नहिकापिलौकि
कजन्यत्वसंशयोनस्यादितिचेन्न ॥ ज्ञानप्रयासस्यैवपूर्वोपस्थितकोट्योर्भानसंभवादिति ॥ यत्तु ॥ संशयपू
र्वतत्कोट्यंशेलौकिकसन्निकर्षसत्वेकथंसंशयस्यलौकिकत्वंकथंवातत्रसंशयेविपरीतकोटिभानं ॥
तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधकायास्तत्रसत्वादिति ॥ तन्न ॥ तत्रलौकिकसन्निकर्षसत्वे
पिसंशयजनकदूरत्वादिदोषस्यलौकिकप्रत्यक्षप्रतिबंधकस्यसत्वेनलौकिकप्रत्यक्षसामग्र्याः अभा
वादुभयोपपत्तेरित्यन्यत्रविस्तरः ॥ कस्यचिन्मतंदूषयति ॥ ने[illegible]ति ॥ इतिप्रयुक्तमित्यनेनान्वयः ॥ न चे
न्वेवंबाधनिश्चयकालेसंसृष्टत्वज्ञानाभावादेव अनुमित्यभावोपपत्तौबाधनिश्चयस्या[illegible]नुमितिविरोधित्व ना
मिति[illegible] ॥ नन्वप्रसिद्धसाध्यकानुमितिः कुत्रापिनभवत्येवेत्यत आह ॥ आदीति ॥ आदिनासिषाधयि
षाकालीनसिद्धिपरिग्रहः ॥ नचसंशयांतरोत्पत्यैवानुमितिरितिवाच्यं ॥ सतिविशेषदर्शनेसंशयायो
गाद्ध्यसंशयादिति ॥ ननुसंशयजन्यकाल्पिसिषा
धयिषाकालीनसाध्यनिश्चयात्मकसाध्यसंसृष्टत्वज्ञानमस्त्वेवेत्यत आह ॥

 नानुमादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः ॥ न च संशयसामग्र्याः सत्वात्कथं पक्षैकदेशे साध्यनि
श्चय इति वाच्यं ॥ सर्वत्र धर्मितावच्छेदकके संशयसामग्रीसत्वेपि घटत्वादिधर्मितावच्छेदकक साध्यनिश्चयो
१७ त्पादे बाधकाभावात् ॥ समानप्रकारकत्वेनैव विरोधात् ॥ समानविषयकत्वेन प्रतिबंधकत्वेप्याह ॥ अस्तु वे
ति ॥ तस्य ॥ सहचारग्रहस्य ॥ तस्य स्वरूपसत एव विरोधित्वेन तज्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वाभावा
दिति भावः ॥ न च तत्र सहचाराग्रहप्रयोजनक संशय एव हेत्वाभासस्तस्यापि स्वरूपसत एव विरोधित्वात्
ग नच संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्त्वाभासत्वमिति वाच्यं ॥ सर्वमभिधेयमित्यादावभिधे
यत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः ॥ तदिदमथेति ॥ तेन साधारण्येनातिव्याप्तिरिति भावः ॥
धूमप्रागभाववत्वेति ॥ तस्य व्याप्यतावच्छेदके। भूतधूमत्वघटितत्वेन तत्संग्रहो न स्यादिति भावः ॥ स्वस्य
स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वरूपाभावाद्धर्मांतरेति ॥ न च नीलधूमत्वस्यापि तादृशधर्मा १७
तराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यं ॥ स्वाविषयकप्रतीतिविष

यत्वस्य स्वपर्याप्त्यवच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितत्वस्य त
दर्थत्वात् ॥ तथा धूमत्वपर्याप्त्यवच्छेदकताकप्रकारत्वे नीलत्वादिविशिष्टधूमत्वपर्याप्त्यवच्छेदकताकप्रका
रत्वयोर्भेदात् ॥ नन्वेवं वह्निमदन्या ॥ इति वह्नित्वस्य वह्निव्याप्यतावच्छेदकत्वानुपपत्तिः तस्य वह्नित्वरूप
तादृशधर्मांतरघटितत्वात् ॥ धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तिभिया धर्मांतरस्य विशेष्यविधयाघटकत्वविवक्षणस्या
शक्यत्वादिति चेन्न ॥ स्वसमानाधिकरणपदेन स्वव्यापकस्य विवक्षितत्वात् ॥ वह्नित्वस्य वह्निमदन्यावृत्तित्वाद्व्या
धूमत्वस्य धूमान्यान्यत्वव्यापकत्वाद्दोषासंभवात् ॥ स्वव्यापकत्वे च धर्मांतरस्य स्वघटकसाध्यसंबंधितावच्
छेदकत्वेन ॥ अन्यधूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः ॥ धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वा
व्यापकत्वादिति ॥ विरुद्धयोः परामर्शहेत्वोरित्यत्र विरुद्धयोर्हेत्वोः परामर्श इति भ्रमवारणाय ॥ ह ॥ स्वसाध्येति ॥
स्वसत्प्रतिपक्षत्वेनाभिमतो हेतुः तत्साध्यस्य विरुद्धो यः साध्याभाव इत्यर्थः ॥ ननु सत्रिकालीनघटत्वादिमत्त्वो
क्तमयुक्तं तत्र पक्षे घटत्वधर्मस्यन्यत्वाभावादत आह ॥ पक्षतावच्छेदकेति ॥ काले स्थिवदत्रास्यापि पक्षतावच्छेदक
त्वबाधसंभवात्तदप्रदर्शनेन न्यूनत्वस्यन्यूनतापरिहर्तुमाह ॥ एवमिति ॥ बोध्यमिति ॥ तत्र पक्षे वृक्षे संयोगव

दिनकरी। त्वेपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावादिति भावः॥ ॥श्री॥ इत्यनुमानं॥ ॥श्रीगुरुभ्यो नमः॥ अवसरसं अनुमान
१८

इति
मुक्तावली व्याख्या दिनकरी
अनुमानखण्डम्
समाप्तम्।

112
5 (B)

१८

घटके सपक्षत्वं निश्चयगर्भं ननु साध्यवत्त्वमात्रमित्याह॥ सपक्ष इति॥ एवमग्रेपि॥ सपक्षत्वविपक्षयोर्निवेशस्य फल
माह॥ शब्देत्यादिना॥ पूर्वमुक्तमिति॥ असाधारणः साध्यासमानाधिकरण इत्यादिनोक्तमित्यर्थः॥ केवलान्वयि
पक्षकत्वेति॥ अत्र पक्षता साध्यसंशयरूपा ग्राह्या॥ तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा सिषाधयिषा
वनदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात्तस्य सद्धेतोरलक्ष्यतया सिषाधयिषाविरह
विशिष्टसिध्यभावस्य तदा केवलान्वयित्वेपि तत्र नातिव्याप्तिः॥ अनुपसंहारिणो हेत्वाभासत्वमुपपादयति॥
सर्वमभिधेयमित्यादिना॥ सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्थलाभावादिति॥ संशयोत्तरक्षणे निश्च तदा
यवारणाय निश्चयं प्रतिसंशयसामग्र्याः प्रतिबंधकत्वस्यावश्यं वक्तव्यतया प्रकृते साध्यसंदेहसत्वे तत्रत्वेत
त्सामग्र्याः सत्वेन साध्यनिश्चयस्य कुत्राप्यसंभवेन व्यापकसामानाधिकरण्यविशिष्टधर्मत्वादिरूपव्याप्ति
ग्रहानुत्पादान्न तत्रानुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमिति भावः॥ क्षेतरभावादिति॥ तदानीमपि केवला
न्वयित्वे पक्षकत्वरूपस्यानुपसंहारित्वस्य क्षेतरभावादित्यर्थः॥ तथा च तत्रानुपसंहारित्वस्य सत्वात्तस्य व्याप्तिग्रा